M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 783

Title: Nyaya - bodhon

783

Book on न्याय by
गदाधर

	Gādādharī	: Title
	Gadādhara	: Author
		: Editor
	Sam. 1856	: Year, Vols.
		: Publisher
783		: Remarks

783

॥श्रीगणेशाय नमः॥ अनुमानं निरूपयति॥ लिङ्गपरामर्शरूपानुमानस्य लक्षणमनुमानमिति लक्ष
णं। तच्च लिङ्गपरामर्श इति स्वरूपं। अथानुमानेन प्रमाणमित्यादिना प्रामाण्यं त्वनुमाने त्रिविधमिति वि
भागो बोधकः सर्वः। अनुमानविशेष्यकलक्षणादिप्रकारकप्रतिपत्त्यनुकूलो योऽव्यापारस्तदुत्तरकालीनो यो
लक्षणादिप्रकारकस्याद्यादिविशेष्यकप्रतिपत्त्यनुकूलो व्यापारोऽव्यवहितोत्तरकालकर्त्तव्यत्वेन तद्बोध
नेयत्तदनुकूलत्वमित्याकारकार इति बोधः। आद्यो व्यापारस्तत्कारणमित्यादिशब्दात्मकः। द्वितीयोऽनुमिति
चरमकारणं व्याप्तिशब्दात्मकः बोधनं च तस्येत्यादिशब्दः। अत्र स्वार्थानुमितावप्रामाण्यज्ञानानास्कन्दित
परामर्शत्वेन हेतुता परार्थानुमितौ तु न्यायप्रयोज्यविजातीयपरामर्शत्वेन तस्याप्रामाण्यज्ञानास्कन्दित
त्वात्। न चानुमितित्वपरामर्शत्वाभ्यां सामान्यत एव कार्यकारणभावः स्वार्थानुमितिं प्रति तु अप्रामाण्य
ग्रहाभावो धिक इति क इति वाच्यं। तथाप्यप्रामाण्यग्रहास्कन्दितान्यायप्रयोज्यपरामर्शात् परार्थानुमि
त्यप्रसंगकारणतयोर्वैजात्यस्यावश्यकत्वात्॥ तथा च विभिन्नसामग्रीप्रयोज्यतावच्छेदकतया स्वार्थ
तापरार्थत्वेऽनुमितित्वव्याप्यजाती। करणे तु स्वार्थानुमितिकरणत्वं स्वार्थत्वं परार्थानुमितिकरणत्वं प

रार्थत्वमिति प्राञ्चस्तदसत्। परार्थस्थलेऽप्रामाण्यज्ञानास्कन्दितादनुमित्युपगमे न्यायजन्यज्ञानस्यैवोप
नयार्थविषयकत्वेन मूले परामर्शोत्तरस्वीकारवैयर्थ्यात्। अप्रामाण्यज्ञानास्कन्दितात्तस्मान्नानुमितिरि
ति भ्रमत्वेऽभिधानात्। निरूढमनुमानमिति व्याख्या नाद्या। अप्रामाण्यज्ञानास्कन्दितानुमानस्यानिरूढ
त्वात्। एकहेतुकन्यायाधीनपरामर्शे द्वैविध्यं साध्यव्याप्यहेतुत्वं तत्कालेऽनुमितौ जातिसंकराद्यापातात्वेत्यतो आदिनाप्रति बंधकत्वादि परिग्रहः
व्याचष्टे परार्थेति। विप्रतिपत्तिस्वावकपरविप्रतिपत्तिर्जिज्ञासया न्यायप्रयोगो विचारस्ततः यदा यादिस्यानिश्चयेऽव
यः तत्प्रयोज्यपरामर्शोत्तरकाले इति यावत्। परोऽर्थः प्रयोजनं यस्येति विग्रहः संशयस्य दुःखहेतुत
या न प्रयोजनत्वमिति न स्वार्थकं परपदं। अर्थस्साध्यावगाहित्वसाम्यात् संशयसामग्रीस्तु च न्यायस्या
यसाध्यत्वात् चयाय च विकाह इति। एवं विवादकालीनेत्यानुमानीकसाध्यनिश्चयेऽपि तत्प्रयोजकविरहसं
कयात्वाप्रामाण्यशंकया अनिरूढत्वे स्वतनुप्रयोजकन्यायसाध्यानुमितिविषयत्वज्ञानस्यावश्यकत्वार्थं न्या
यसाध्यत्वमुक्तं। ज्ञानं परामर्शस्यानुव्यवसायादिप्रयोजनकत्वे न्यायसाध्यत्वस्याप्रयोजकत्वात्तथानो
क्तम्। न्यायजन्यशाब्दबोधस्योपनयार्थेऽप्यप्रामाण्यग्रहास्कन्दितत्वेन लिंगसंशयद्वारा साध्यसंश

ग.आ. यद्धेतुत्वमिति किंतद्दित्याकांक्षायामाह तः इत्यनुमानमित्युक्तं। साध्यपदं न जन्यत्वार्थकमित्याह व्याप्ति
ज्ञायमानेति। एतन्मते न्यायेन्य योगसमर्थनार्थं। न च तन्मते विशेष्यस्य ज्ञानस्य लिंगत्वात्स्वजन्यन्याय
२ साध्यत्वासंभवः एवं च विनिगमनाविरहेण विशेषणस्यापि हेतुत्वात्तत्र तत्संभवेन तद्विशिष्टस्य सं
गतमिति वाच्यं। परार्थानुमानत्वावच्छेदेन न्यायसाध्यत्वप्रदर्शनार्थं तथाभिधानात्। पूर्वं केवलान्व
यिग्रंथे ऽनुमानस्येवानुमितेरपि त्रैविध्यस्य प्रदर्शितत्वात्स्वानुमानमिति मूलस्यानुमित्यर्थकत्वमा
हाथवेति। एतत्स्येतत् उक्तलक्षणलक्षितमित्यर्थः। वस्तुतस्तु विवादनिवर्तकत्वस्य परार्थे लोकानाया
हा-ऽथवेति। नन्वनुमानस्यैव न्यायज्ञानप्रयोजनत्वे तस्य साध्यसंशयनिवर्तकत्वरूपपरार्थत्वा
संभवादनुमितिरिति व्याख्यानं व्यर्थमिति चेन्न। अनुमितित्वनीयक्षणपर्यन्तं संशयोत्थितेर्वि
अविप्रतिपन्न संशयनिवृत्त्य नुजनः विक्तत्वात्तथाय तद्व्याख्यानात् पूर्वोक्तार्थासंभवादाह परार्थमिति परमत्वमुत्कृष्टत्वं न च दुःखसा
धनाभावे संशयनिवृत्तावुक्तत्वमिति तस्याः आनुकूपरपदार्थत्वाभावेन संगतिः विजयप्रयोजकत्व
मपि दर्शयति। परस्येति। परापरकीयानिवृत्तिर्यस्मादिति कोऽसमस्तमानपरपदेऽपि लक्षणस्या

॥२॥

दतस्तत्रोक्तम्। प्रतिवादिनीव प्रतिवादिसिद्धार्थज्ञाने ऽप्रमात्वज्ञानसंपादनं। एतत्कत्वे ऽनुमिति
रिति व्याख्यानमनावश्यकं परामर्शे ईदृशपरार्थत्वाभावात्। एतेन परार्थत्वाद्यभिधानेन। निरूपणे
ति। न्यायतदवयवनिरूपणेत्यर्थः। उपदर्शितमिति तत्प्रदर्शने वा ग्रंथप्रवणेन तत्रूपपत्तेः स
ल्लिंगपरामर्शमात्रस्य न्यायज्ञानप्रयोजनत्वावच्छेदाय एवकारः। नन्वनुमितिनिरूपणानंतरं न्यायनि
रूपणे कासंगतिरित्यत आह कारणत्वमिति। प्रयो—त्वमित्यर्थः तस्य हेतुतानंतर्यमेवेत्याह स्मरणे
ति। प्रथमकल्पे स्वप्रयोज्यानुमितिप्रयोजकत्वं संबंधः न च स्वादिनाऽकथ्यते स्वमनुमानं। द्वितीयक
ल्पे च स्वप्रयोज्यानुमिति। प्रयोजकत्वं संबंधः परार्थं न्यायसाध्यमित्यासां कथ्यते। स्वसंशयनिवृ
त्तिः स्वप्रयोज्यसंशयनिवृत्तिप्रयोजकत्वं तु युक्तम्। एतादृशसंबंधज्ञानसहितादनुमानादिज्ञा
नात् न्यायरूपापदसंबंधिस्मृतिरित्यर्थः। प्रसंगप्राप्यन्याय तदिः को न्याय इति जिज्ञासायामनंत
राभिधानात्। युक्तस्मृतिविषयत्वेन व्यापकत्वाबोध्या। इतीत्यादिमूलं इतिपदं प्रकांतसाधकत्व
तार्थकं पंचम्यंतं। तथा चानुमानादि विशेष्यकजन्यत्वप्रकारकप्रमितिप्रसन्नानुकूलो यो व्यापारस्त
दुत्तरकालीनो यो वर्तमानो न्यायनिष्पसाधकता ज्ञानजन्यजिज्ञासाधीनो जन्यत्वप्रकारक

ग.आ. प्रतिकूलो व्यापारस्तज्जन्यफलविशेष्यो न्यायादिरित्यर्थः। तद्वयवादिति। तत्पदव्यापकत्वघ-
२ टितधर्मपुरस्कारेणैवावयवनिरूपणान्न्याय। उदाहरणेनेति॥ ननु सपक्षसत्त्वविपक्षासत्त्वयोः
कथं व्याप्तिघटकत्वमिति चेत् प्राचां मते साध्याभाववदवृत्तित्वे सति साध्यसामानाधिकरण्यस्यैव व्या-
प्तित्वात्॥ तथा चोदाहरणस्य व्याप्तिबोधकत्वेन तदुपनयबोधकत्वमक्षतमिति भावः। केचित्तु उप-
नयनेन पक्षसत्त्वादीनामुत्तरकालीनो मानस एव बोधः अवयवान्तरेणापि सपक्षसत्त्वादीना-
मित्यग्रे स्फुटमित्याहुः॥ निगमनेनेति। तस्य दृश्याबाधितत्वादिविशिष्टलिङ्गेत्वलक्षणः परे तु प्र-
तिज्ञात्वे हेतुत्वलिङ्गज्ञाप्यसाध्यबोधनेन पुनः तादृशसाध्यबोधे किं प्रयोजनमित्याकाङ्क्षायाम-
बाधितत्वादिबोधनस्यैव प्रयोजनत्वेनाकाङ्क्षा तच्च हेतुरबाधितत्वादिमान् साध्यनिष्ठहेतुज्ञा-
नाज्ञाप्यत्वबोधकवाक्योत्तरवाक्यबोधितसाध्यनिष्ठहेतुज्ञाप्यत्वघटकहेतुत्वादिति रीत्येत्याहुः
नोक्तस्यात्र पदस्य लक्षणवाक्ये इति नार्थः। तस्य प्रतिपादकत्वप्रतिपादकत्वाद्यनोच्याचष्टे सम-
स्तेति। लिङ्गे सपक्षसत्त्वादिरूपतानाधर्मवदित्याकारकवाक्ये इत्यर्थः। न्यूनतां परिहरति। इद-
मिति॥ तादृशस्य बोधप्रयोजकवाक्यपंचकमात्रवृत्तिसमुदायत्वोक्तेर्नायं दोषः। नात्रपद-

॥३॥

दानाद्बोधो वह्निमान् पर्वतादिः अश्मवानयमुत्तरस्य इति चेन्न। लिङ्गपक्षवृत्तिसपक्षवृत्तीत्यादिवाक्यपं-
चकेऽतिव्याप्तेः प्रतिज्ञात्वादिना वाक्यानिवेशे च प्रयोजकान्न वैयर्थ्यान्नु सिद्धान्तलक्षणे पर्यव-
सानम्। स्वार्थविशिष्टज्ञानमित्येकत्वोक्तेलक्षणे एकज्ञाननिवेशाय तामुपाध्यायानां मतमादर्श-
यति। अनुमितीत्यादि। चरमत्वमनुमितिजनने स्वोत्तरज्ञाविज्ञानानपेक्षत्वं। यत्तु स्वार्थानुमिति-
जनकमासपरामर्शजनकबोधजनकस्य वह्निव्याप्यधूमवानयमिति वाक्यस्य वारणाय चर-
मेति। अनुमित्सोर्याचरमापरार्थे स्वार्थ इति तन्तुच्छं चरमत्वघटितत्वस्य चरमपदार्थत्वाभावा-
त्। महावाक्यार्थबोधस्येति। विशिष्टैकार्थतापन्नबोधस्येत्यर्थः। स च निगमनैकार्थतापन्नो
यनुयन्वयार्थ्यस्तद्विधेयकउदाहरणार्थान्वितो यो हेत्वर्थान्वितप्रतिज्ञार्थस्तदुद्देश्यकबोधोऽननु-
पगापत्तेउपनयार्थनिगमनार्थान्वयेन बोध्यः उदाहरणवाक्ये च यो य इत्यस्य स इत्यस्य य-
थाक्रमान्तस इत्यस्य च तात्पर्यग्राहकत्वमात्रं वह्निपदस्य धूमव्यापकवह्नौ लक्षणा धूमवत्प-
दार्थेन हेतोऽभेदान्वयाद्धूमव्यापकवह्निमद्भिन्नधूमवानुदाहरणार्थः उदाहरणार्थं वस्तु

ग॰भा॰
४

वच्छेदकतानिरूपितहेत्वर्थघटितप्रतिज्ञार्थोद्देश्यतानिरूपिता यानिगमनार्थावच्छिन्नोपनयार्थवि
धेयता तच्छालिशाब्दबोधेऽभिन्नप्रतिज्ञादिपंचकत्वेन कारणत्वेनाशयः प्रतिज्ञायकेति। तावद
र्थबोधत्वादिना शाब्दबोधपदलक्ष्यं तदर्थस्वयंनिवर्त्तनइत्यावत्। यथाश्रुतत्यागेबीजमाहत्व
ति। ननु अयोजकत्वं तत्परित्यागे न्यायैकदेशोऽस्ति व्याप्तिः तावदर्थबोधजनकताव्यापकत्वात्स्तोके
लस्येत्यवादनमाह तादृशेति। न्यायज्ञाने एककारणता नास्तीत्येव एकैककारणतामाह॥ अत्र तु अस्ति
ज्ञाने न्यायैकदेशोऽस्ति व्याप्तिरित्यत आह यादृशयादृशेति। अन्येयायाचेत्तिवाक्ये। यायाविषयितेति
तुनोक्तं। सर्वासां तर्कतानुपूर्वीविषयितानिरूपकवर्णप्रसिद्धेः। ननु तत्तद्धर्मावच्छिन्नत्वमेवस्य वर्णे
एव न सर्ववर्णे इत्यत आह तादृशेति। यादृशधर्मश्येतत्पर्वतोवह्निमानितिवाक्यनिष्ठानुपूर्वीत्वहान्त
द्विशिष्टयोर्वासमुदायत्वेन तदाकारवाक्यसहस्रघटितसमुदायस्य त्वेकवाक्यघटितस्य न्यायस्ये
त्यसेन वद्यत्वन्नस्तादृशोऽस्यपिकश्चित्। यत्तु तावदर्थबोधकारणतावच्छेदकविषयतावच्छेदकसमु
दायत्वं न्यायत्वं। न्यायघटकतावद्वर्णवृत्तिसमुदायत्वावच्छिन्नविषयतात्वेन कारणतावच्छेदक

॥६॥

त्वात्। नच तावद्वर्णवृत्तिसमुदायत्वज्ञानत्वेन न हेतुत्वं आनुपूर्वीविषयकत्वस्य तद्घटकसकलव
र्णसमुदायत्वज्ञानसाधारण्यात् तनाघ्यानुपूर्वीविशिष्टसमुदायत्वज्ञानत्वेन। तादृशानुपूर्वीविशिष्ट
निगमनमात्रवृत्तिसमुदायत्वज्ञानसाधारण्यादिति वाच्यं तथाविधसमुदायत्वविशेषावच्छिन्न
ज्ञानत्वेन हेतुत्वोपगमात्। तादृशसमुदायत्वविशि॰ष्टविषयितात्वेन तथात्वेतु स्वनिरूपकविष
तादृशविषयितानिरूपकतावच्छेदकसमुदायत्वं मात्रत्र च न व्यापकत्वप्रवेश इति मतेन तन्निरुक्त
र्तुमाह तादृशधर्मश्येति। समुदायत्वमाकांक्षादिमत्पदसमूहत्वं तत्र समूहत्वज्ञानस्यानुपयुक्त
त्वयाऽकांक्षाज्ञानत्वेन हेतुत्वं कल्पितं। आकांक्षाचानुपूर्वीविशेषः। महावाक्यार्थबोधघटितत्वन्त
त्वेपि तादृशोपनयोत्तरत्वविशिष्टनिगमनत्वरूपानुपूर्वीज्ञानत्वेनैव हेतुत्वमित्यत उक्तं कार्यका
रणभावस्याप्रामाणिकतया न्यायत्वरूपसमुदायत्वे तादृशविषयतावच्छेदकत्वासंभवात्॥
पर्वतो वह्निमानिति शाब्दबोधे आनुपूर्व्या तरसाधारणत्वात्सामान्यं न कारणतावच्छेदकघटक
मिति विशेषपदं। मनोयोगयोग्यादिकारणताया योग्यताज्ञानादिविषयाकारणतायायथैवं

गदा·आ

५ तर्णत्वे तत्तदवच्छेदकविषयितानिरूपकवर्णप्रसिद्ध्याह प्राथ्वज्ञानविरहेति। तत्वे चैकावच्छि
न्नविषयिताघटितधर्मावच्छिन्ननिर्णयत्वावच्छिन्नत्वात्। तात्पर्यग्राहकेन्नयसमूहालंबने तात्प
र्यज्ञानत्वावच्छिन्नकारणतायास्तादृशविषयत्वावच्छिन्नत्वायोग्यताग्राहकेन्नयसमूहालंबने चयो
ग्यताज्ञानत्वावच्छिन्नकारणतायानिर्णयत्वानवच्छिन्नत्वाच्चदासः हेतुतयेति। यद्यपि समाना
समानानुपूर्वीकनानावाक्यविषयितान्यतमविषयिताशालिज्ञानत्वेन पर्वतो वह्निमानित्याका
रकबोधहेतुत्वे यत्किंचिच्छाब्दबोधानुधावनमफलं तथापि कारणानंतरत्वविशिष्टशाब्दबोधं प्र
ति असमानानुपूर्वीकवाक्यानुत्तरतादृशबोधं प्रति वा पृथक्कारणताकल्पनं त्वावश्यकं। पर्वतो वह्नि
मान् पर्वतो दहनवानिति वाक्ययुगलोत्तरशाब्दबोधस्य च समानानुपूर्वीकवाक्यज्ञानविरहविशि
ष्टासमानानुपूर्वीकवाक्यज्ञानानुत्तरत्वं निवेश्य कार्यतानिर्वाहः अनुगतरूपं पूर्वपूर्ववर्णविषयतानि
रूपितचरमवर्णविषयतात्वादि। प्रतिज्ञादिघटकत्वावच्छेदकरूपेण घटकवर्णघटितसमुदायवार
णाय तत्तदज्ञाने वाच्ये। समानानुपूर्वीकवाक्यानिश्चयत्वेन हेतुत्वात् आनुपूर्वीसाधारणविषयत्व ॥५॥

व्यापकत्वासंभवात् तद्वर्णत्वनिवेशः वर्णत्वव्याप्यकत्वादिव्यापकजातिविशेषः। प्रतिज्ञादिपंचकघटकैकदे
शसमुदायेऽतिप्रसंगवृत्तिव्यापकत्वनिवेशः नत्वेशमर्थः विनिगमनाविरहेण प्रतिज्ञाघटकवर्ण
समानकारणतानांलक्षणे घटकत्वात्तावच्छेदकविषयताश्रयवर्णवृत्तित्वस्य तरसमुदायत्वेऽसत्वात्।
साक्षादवच्छेदकतानुनिवेश्या अन्यथा परंपरया तदवच्छेदकत्वे विषयताश्रयत्वाविधेकदेशवृत्तित्वे
स्वत्वेनातिप्रसंगानुद्धारप्रसंगात्। नच विषयतायां साक्षादवच्छेदकत्वेविवक्षितनुमशक्यमेव। त
द्विशिष्टज्ञानत्वस्यैव तथात्वादिति वाच्यं। ज्ञानत्वस्य वैशिष्ट्यगौरवेण ज्ञानियत्वेन विषयताया साक्षा
दवच्छेदकत्वात्। मैवं। यत्किंचिदेकवर्णवृत्तिविषयतानामेव कारणतावच्छेदकत्वं इतरविषयतानां
च तदवच्छेदकत्वमितिरीत्या प्रतिज्ञाप्रतिपाद्यार्थबोधीयाएकाकारणताहे त्वाद्यर्थबोधीयाएकैका
रणतेति पंचैव कारणताः प्रवेश्याः ननु यावत्स्वगौरवादिति व्यापकत्वोपादानात्॥ यत्तु वा सार्थबो
धे तद्घटकसकलवर्णज्ञानानामेव हेतुतया प्रत्येकं सकलविषयता एव कारणतावच्छेदका एवं च
तादृशीयाया कारणतावच्छेदकविषयताश्रयवर्णवृत्तिसमुदायत्वस्यैव लक्षणत्वस्य सुच

ग॰आ॰
६

वत्कल्प्यतया

च तथा तत्र ज्ञातिविषयतावारणाय वर्णत्वेस्यावश्यकत्वेपि व्यापकत्वं व्यर्थमिति चेन्न तुच्छे। वि
शेषणतावच्छेदकवर्णज्ञानादिना शाब्दार्थबोधवारणाय तत्तद्वाक्यार्थबोधे तत्तद्वाक्यानुपूर्वीज्ञानस्यै
व हेतुतयाः—अवश्यहेतुतया उक्तहेतुताया निर्बीजत्वात्। यद्यपि क्रमघटकवर्णज्ञानानां प्रत्ये
कं न हेतुता गौरवात्। किन्तु तावद्वर्णविषयताशालित्वेनैकहेतुतैव। एवं चावच्छेदकीभूतयावद्वि
षयतानिवेशेनोपपत्तेर्व्यापकत्वं व्यर्थमेव परं तु क्रमो चारितप्रतिज्ञादिघटकवर्णसमुदाय
त्ववारणाय स्वाश्रयीभूतप्रतिज्ञादिघटकाद्यादिवर्णाव्यवहितोत्तरत्वसम्बन्धेन तद्घटकद्वितीया
दिवर्णवृत्तियत्समुदायत्वं तदन्यत्वं निवेश्यमिति। तदपि तुच्छतरम्। तथा सति तत्तद्वाक्य
घटकक्रमोच्चारितसकलवर्णज्ञानाच्छाब्दबोधवारणाय तत्तत्प्रतिबंधकत्वप्रसंगात्। के
चित्तु सकलवर्णज्ञानानामपि हेतुतापरं तु यावत्कारणतात्वत्र किं कतिपयकारणतापायत्ये
नैव तत्सकलाः—आद्ये कतिपयकारणतावच्छेदकीभूतविषयताश्रयवर्णसमुदायत्वसत्वादे
कदेशेऽतिव्याप्तिः। अन्त्ये सकलकारणतावच्छेदकैकविषयिताप्रसिद्धेस्तादृशैकविषयि

॥६॥

तानिरूपकवर्णवृत्तित्वविशिष्टतादृशापरविषयितानिरूपकवर्णवृत्तित्वविशिष्टत्वादिरीत्या निवेशे
विशेष्यविशेषणभावे विनिगमनाविरहेण पर्वतो वह्निमान् पर्वतो धूमवानित्यादि न्यूनाधिकवर्णघ
टितप्रतिज्ञात्वेदं न च लक्षणं संमतम्—आनुपूर्वीज्ञानहेतुतामात्रं व्यञ्जनमुपवर्णितमित्याहुः। यत्तु
वर्णत्वेकत्वादेर्नियतत्वात्। एवं च तादृशयत्किंचिद्वर्णत्वव्यापकत्वमेव विवक्षितं। एतेन तादृशयत्किंचि
द्वर्णत्वव्यापकत्वमेकदेशसमैकदेशविगतं। तत्तद्वर्णत्वव्यापकत्वं तु सकलतद्वर्णत्वाधिकरणैकाप्रसि
द्धिग्रस्ते तादृशैकवर्णत्वव्यापकत्वे सति तादृशापरवर्णव्यापकत्वे सामंत्यादिघटितदोषग्रस्तमित्यपास्तं। य
त्किंचिद्वर्णत्ववतां च स्वविषयितासमानाधिकरणतादृशावच्छेदकीभूतविषयितानिरूपकत्वविशि
ष्टतादृशविषयितानिरूपकतावच्छेदकत्वसंबंधेन। स्वप्रतिज्ञादिघटकतावच्छेदकत्वादि। तेन रूपेण
तद्घटकवर्णक्रमस्यापि प्रतिज्ञादिप्रतिपाद्यार्थबोधकत्वात्तत्साधारणसमुदायवारणाय निरूपक
तावच्छेदकप्रवेशः—तस्मात्तन्निवेशेऽगौरवात्॥ स्वावच्छिन्ननिरूपकताकत्वस्वान्यधर्मावच्छिन्नत्वनि
रूपकताकत्वोभयाभाव तादृशविषयितानिरूपकत्वेसति स्वावच्छिन्नत्वस्वान्यधर्मावच्छिन्नत्वोभ

ग.आ. यात्तावकत्वादृशविषयितानिरूपकत्वे सति यावत्तादृशनिरूपकतावच्छेदकत्वं वा संबंधः। ए
वं चैतादृशसंबंधेन वर्णत्वावच्छिन्नैकदेशावारणाय व्यापकत्वप्रवेशः। यावत्कारणं त्वेतिग्रंथता
त्पर्यमप्यत्रैवेति तत्तुच्छम्। विशिष्यघटादिनानिवेशापद्यानि गिरीन्द्रमान्नसौलोवद्धीत्यादावव्याप्तेः
॥९॥ अस्मन्मते को वर्णः खो वर्णः इत्याद्यनुगतमतिसिद्धवर्णत्वस्य जातिरूपत्वात्। तादृशेति। प्रतिज्ञाद्या
दिकं मादाय संभववारणाय व्यापकत्वं तत्र सकलपदोपादानं च। तथा च निरुक्तयत्किंचिच्छाब्द
बोधनिरूपितसकलवलकतावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिष्ठस्वून
वृत्तितानिरूपकत्वं यद्यत्समुदायत्वं तद्भिन्नं यत्तादृशवर्णत्वव्यापकसमुदायत्वं तद्वत्वमिति फल
द्यार्थः। नन्वत्र स्वूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसामानाधिकर
ण्यं। न चैवं स्वाधिकरणे यत्प्रत्येकं प्रतिज्ञादि तत्र न्यायत्वावच्छिन्नभेदसत्वेनासंभव इति वाच्यं।
स्वावच्छिन्नानुयोगिताकभेदनिवेशात्। प्रतियोगिताप्रतियोगितायां चानुयोगितासमानाधि ॥९॥
करणभेदप्रतियोगितावच्छेदकत्वं देयम्। तेन वाक्यांतरसाधारणसमुदायत्वस्य न्यायत्वस्वून

।तथा सति निरूपकतावच्छेदकत्वे सति तेन कथंचिद्वर्णजातिवारणेऽपि संसर्गविषयतास्थलेनानुपूर्वीवारणेऽपि
वा॥८
॥९॥

वृत्तित्वेऽपि नासंभवः। स्वसमानाधिकरणप्रतियोगितायाः पर्याप्तिघटितस्वरूपसंबंधे
नावच्छेदकत्वं वाच्यं। उच्चारणभेदेन न्यायभेदेन हेतुन्यायत्वस्यापरन्यायत्वनिष्ठस्वूनवृत्तितानि
रूपकतयाऽसंभव इति स्वसमानाधिकरणपदनिवेशः तादृशवर्णत्वनिष्ठस्वूनवृत्तितानिरूपकत्वे
का वसंभव इति समुदायत्वव्यापकत्वयोर्निवेशः एवं च घटमानयेत्यादिवाक्यवारणाय यद्वांत
रेव्यापकत्वं तत्र प्रतिज्ञाहेतुसमुदायादिवारणाय यावत्कारणं निवेशः। समुदायैकदेशभेदा
नुपगमे तु। यद्वा स्वावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्ये तादृशानुयोगितावच्छेदकत्वे
वा सति स्वसमानाधिकरणत्वं तत्। प्रत्येकप्रतिज्ञात्वादेरपि वारणाय यद्वांतरेव्यापकत्वं। एवं च
तत्न्यायस्वरूपतादृशसमुदायत्वनिष्ठस्वूनवृत्तितानिरूपकत्वस्य लाघवमेवैकन्यायघटकवा
क्यं पंचकवृत्तिसमुदायत्वमादायातिव्याप्तिप्रसक्तिः यद्विद्वान्तरेतावदर्थविषयकयच्छाब्द
बोधो निवेश्यते एतद्दलेऽपि तच्छाब्दबोधव्यक्तेरेव निवेशान्न दोष इत्युक्तलेतदफलोपधायकतानि
वेशपर्यवसानापत्तेः। नियमतो वाक्यांतरार्थविषयकन्यायार्थबोधस्वत्वेवाक्यांतरघटितसमुदा

ग॰आ॰ ८ वेत्यादि। एवं न्यायत्वेप्येकैकन्यायघटकवाक्यपंचकवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वे
सत्यवरहसंत्तत्वमस्त्विति चेन्न। यत्किंचित्तादृशसमुदायत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे
सति तद्भिन्नत्वे हि तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वं। अवच्छेदकत्वं च पर्याप्तिघटितसं
बंधेन सामान्यतस्तादृशसमुदायत्वनिवेशे पर्वतो वह्निमान् पर्वतो दहनवानित्यादिन्यायत्ववति
एकतरन्यायेचालनीन्यायेन वाक्यांतरसाधारणसमुदायभेदसत्वेनातिव्याप्तिरतो यत्किंचित्
निवेशः अस्य संत्तत्ववारणाय तद्भिन्नत्वनिवेशानो। स्वसमानाधिकरणयत्किंचित्तादृशसमुदायत्वा
वच्छिन्नभेदसामानाधिकरण्यं तु समुदायेएकदेशान्तेऽपगमापत्तिग्रस्तं। मुख्यमेति। कथायामा
कांक्षाक्रमेणैवाभिधानमिति मूलेऽस्यत्वलंस्फुटं। मुख्यमप्रयुक्तत्वं सामान्यतः प्रतिज्ञोत्तरत्वम्प्र
न्यहेत्वादिवृत्तियघटसमुदायत्वं तद्भिन्नत्वं। अथ चात्रैव प्रतिज्ञानां न्यायत्वनिवेशोऽधीके
दृः प्रतिज्ञादिपदवत्तत्समानानुपूर्वीकवाक्यपरम्। अव्यावर्त्तकपदार्थभेदानिवेशत्वान्न्याय
समुदायत्वमिति।। एकैकेति। अन्यैकन्यायघटकप्रतिज्ञायांतरघटकहेत्वादिचतुष्टयं एकन्याय
॥८॥

घटवाक्यद्वयमपरत्वघटकवाक्यत्रयं क्रमिकमित्यादिशास्तत्तत्समुदायत्वतत्त्वे च केप्यतिव्या
प्तिर्बोध्या। स्वाश्रयीभूतेत्यादि इदमसंभववारणाय। न त्वेतादृशापत्तिवारणाय कद्रूपेणैव मुख्यमप्रयु
क्तप्रतिज्ञादिसमुदायातिव्याप्तेर्वारयितुं शक्यत्वान्मुख्यमप्रयुक्तेत्यादिव्यर्थं। न च मुख्यमप्रयुक्तेषु प्र
तिज्ञात्वादिकं नास्त्येव किंतु तद्भासमानवाक्यत्वमेवेति वाच्यं। प्रतिज्ञात्वादिकं मिथ्यात्वेनेन विरोधात्। ना
पि स्वाश्रयीभूतप्रतिज्ञाघटकव्यवहितोत्तरत्वमस्य यत्किंचित्प्रतिज्ञाद्युत्तरहेत्वादिवृत्तियद्यद्विव
चत्वेनान्वयबोधः इत्युक्तं। यत्किंचित्प्रतिज्ञाद्युत्तरत्वनिवेशवैयर्थ्यान्न इति चेन्न। तदा स्वाद्येव वैयर्थ्यं
यदि स्वाश्रयीभूतेत्यादिना सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वनिवेशः स्यात्तदैव न किंतु नत्वघटि
तत्वेनैवेति मुख्यमप्रयुक्तप्रतिज्ञादिवृत्तिसमुदायत्वस्यापि भेदकूटस्यावश्यकत्वात्। अथ वा मुख्य
मप्रयुक्तप्रतिज्ञादिवृत्तियद्यत्समुदायत्वं तत्तद्भिन्नत्वमित्यस्यैव पर्यवसानमेवेति। अत एव दी
धितिकृता एतन्न निवेशितं। एतन्मात्रसत्वेऽयं दिक्पार्थोऽस्य पूर्वविशेषणत्यागएव स इति बो
ध्यम्। अत्र च तादृशप्रतिज्ञाव्यवहितोत्तरत्वस्य हेतुरवृत्तित्वतादृशहेतुव्यवहितोत्तरत्वस्य सोदा

ग॰आ॰ हरणवृत्तित्वाद्यन्यतमविशिष्टत्वस्य स्ववृत्तित्वस्वाव्यवहितोत्तरत्वक्षणोदाहरणवृत्तित्वोभय
संबंधेन मन्निशाविशिष्टत्वस्य स्ववृत्तित्वस्वाव्यवहितोत्तरत्वक्षणोदाहरणवृत्तित्वोभयसंबंधेन
हेतुविशिष्टत्वाद्यन्यतमविशिष्टान्यत्वस्य वानुगतस्य निवेशः। अथानुपूर्व्या चरमवर्णत्वपर्याव
सितत्वेन चरमवर्णविषयिताया एव साक्षादवच्छेदकत्वमतः। पर्याप्तिघटितस्वरूपसंबंधेन सा
क्षात्परंपरासाधारणावच्छेदकत्वनाववच्छेदकत्वानायकोटिप्रविष्टत्वमुक्तम्। केचित्तु यद्यपि अ
वच्छेदतावच्छेदकसाधारणावच्छेदकत्वैतायां मानाभाव तथापि विनिगमनाविरहेण पूर्वपूर्वव
र्णविशिष्टचरमवर्णत्वस्यैव चरमवर्णविशिष्टपूर्वपूर्ववर्णत्वस्यापि पूर्वचरमवर्णविशिष्टम
ध्यवर्णत्वादेरप्यानुपूर्वीत्वा—वच्छेदविषयतानां न लक्षणकार्यसाक्षादवावच्छेदकत्वसंभव
तिपरंतु तादृशी या या कारणतातदवच्छेदकप्रविष्टविषयितानिरूपकवर्णवृत्तिसमुदायत्वनिवे
शेनैवैकदेशावृत्तिसमुदायत्ववारणे व्यापकत्वनिवेशवैयर्थ्यम्। न मान्यत्वं तु कस्य हयएवेति नो
हासीन साधारणसमुदायत्वमादाय यातिव्याप्तिरित्युपाध्यायमतनिष्कर्षः। साधुः अथ तावदर्थवि

॥८॥

षयकयत्किंचिच्छाब्दबोधजनकयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनि
वेशादेवोपपत्तौ किमवच्छेदकताकूटोपादानेन। न चैवं प्रतिज्ञाद्यर्थविषयकघटमानयेत्यादिवाक्या
र्थविषयकसमूहालंबनयत्किंचिद्बोधव्यक्तिमादाय घटमानयेत्यादिवाक्यघटितसमुदायेऽतिप्र
संग इति वाच्यम्। तादृशसमुदायत्वनिष्ठमूलवृत्तित्वानिरूपकत्वविशेषणेन वारणात्। अन्य
था त्वन्मतेऽप्यधिकवृत्तिसमुदायत्वे तादृशवर्णत्वव्यापकत्वसत्त्वेनातिप्रसंगस्य दुर्वारत्वापत्तेः।
न च तादृशानिरूपकत्वांतमपहाय तादृशवर्णत्वसमनैयत्यमेव निवेश्यं लाघवात् तथा चोदासी
नविषयकस्य यविषयकयत्किंचिज्ज्ञानमादाय व्यायोदासीनसमुदायेऽतिव्याप्तिवारणाय व्याप
कोटावच्छेदकत्वोपादाने व्यापकोटौ न हेतुपर्यवचिष्टमिति वाच्यं। एवमपि न्यायदृढार्थविषयक
यत्किंचित्समूहालंबनबोधव्यक्तिमादाय मायदृयसमुदायेऽतिव्याप्तेस्तद्विशेषणस्यावश्यकत्व
यात्वत एव घटमानयेत्यादिवाक्यघटितसमुदायेऽप्यतिप्रसंगानवकाशेनावच्छेदककोटिप्र
विष्टत्वविशेषणवैयर्थ्यस्य दुर्वारत्वात्। यत्तु वर्णत्वस्य कत्वादिरूपतया समुदायत्वे तादृशवर्णत्व

वा॰आ॰ व्यापकतायाः संभवेपि न तद्व्याप्यतासंभव इति तावद्वर्णविषयिता एकमात्रविषयितामा
१० त्रवृत्तिरूपेणानुगमय्य तन्निरूपकवर्णत्वव्यापकत्वनिवेशात् न्यायद्वयवारणमिति तत्तुच्छं
वर्णत्वस्य कत्वादिरूपताविराकरणात्। उक्तरीत्यैवोपपत्तौ अनुगमवैयर्थ्याद्गौरवाच्च। अ
त्रेदं समाधानमवगन्तव्यम्। तत्तज्ज्ञानकत्वावच्छिन्नं स्वरूपसंबंधेनैव वक्तव्यमन्यथा घटमान
येत्यादिवाक्ये कालिकसंबंधेन जनकताविशिष्टतज्ज्ञानमादायातिप्रसंगात्॥ अथ कालिकसं
बंधेन तत्तज्जनकतावच्छिन्नज्ञानविषयत्वकर्णत्वव्यापकत्वस्य घटपदत्वरूपसमुदायत्वेस
त्वात्तत्ति — न्यूनवृत्तितानिरूपकत्वसत्वेन नातिव्याप्तिरिति चेत्तर्हि तादृशं प्रतिज्ञात्वादिकमादा
यासंभवः। अवच्छेदकत्वगर्भोपरदत्तस्वरूपसंबंधेन यत्किंचिदेकत्वद्वैशिष्ट्यस्य च निवेशान्न
कोपि दोष इति चेदेच मप्य वय वेऽति व्याप्तिः प्रतिज्ञात्वादेस्तादृशन्यायत्वनिष्ठन्यूनवृत्तित्वादिक
पत्वात् न्यूनवृत्तित्वदेकदेशत्वादेः सकलकारणतावच्छेदकविषयितानिरूपकावृत्तित्वादित्य
वच्छेदकत्वनिवेशात्। न चोक्तवाक्यविषयितानामपि कालिकादिसंबंधेनावच्छेदकतावत्त्वाद्

॥१०॥

स्वरूपसंबंधेनैव तद्वत्वं निवेश्यं एवं चावच्छेदकत्वनिवेशनमधिकमिति वाच्यं। अवच्छेदकत्वं प्रका
रविधया न प्रवेश्यते किं त्ववच्छेदकतासंबंधेन जनकतावत्त्वमेव तथा गौरवात्। एवं प्रतिज्ञादिज्ञा
ने कालिकसंबंधेन तज्जनकतासत्वेनासंभवदुष्परिहरत्वेपि संसर्गतयाऽवच्छेदकत्वप्रवेशाद् इति।
वस्तुतस्तु स्वरूपयोग्यज्ञानकन्यायसंग्रहाय वाक्यांतरघटिततादृशन्यायवारणाय च स्वरूपयो
ग्यताकूपजनकतानिवेश्यते ति उक्ताद्युपर्यवसानं। एवं चावच्छेदकतायाः प्रकारत्वेनैव निवेशो
गौरवान्नावात्। एवं विषयतानां विनिगमनाविरहेण न साक्षादवच्छेदकत्वं संभवति। आगमा
वानुपगमे स्वोत्पत्तिक्षणोत्पत्तिध्वंसप्रतियोगिकान वृत्तित्वरूपाव्यवहितपूर्वत्वस्योत्पत्तिद्वयघ
टितत्वेन गुरुभावीरननया न दृघटितानुपूर्वीविषयतायाएवकारणतावच्छेदकत्वात्॥ पत्वाद्य
वच्छिन्नप्रकारताशालिनिर्णयत्वेनैव विनिगमनाविरहेण तादृशप्रकारतानिरूपितत्वत्वादिनि
ष्ठावच्छेदकताशालिनिर्णयत्वेनापि जनकतायावत्तु शक्यतयावर्णलग्नतज्ज्ञानकतावच्छेदकविष
यिताकवर्णप्रतिसिद्धेरसंभवाच्च। न चेदृशासंभवात् वारणाय जनकतासु वर्णविषयितावच्छि

ग॰आ॰ न्तत्वमेव निवेश्यं पक्षाद्यवच्छेदकतावच्छिन्नजनकतानां वर्णविषयितानवच्छिन्नत्वेन वारणा
दिति वाच्यं। तथा सति तथाविधजनकतावच्छेदकविषयिताश्रयवर्णवृत्तित्वनिवेशेनैव सामं
११ जस्ये वर्णत्वव्यापकत्वोपादानवैयर्थ्यात्। लाघवेन चोत्तरत्वघटितानुपूर्व्यवच्छिन्नज्ञानत्वेनैक
कारणतानिवेशेन व्यापकतानिवेशावश्यंभावात्। अथ पक्षाद्यवच्छिन्नविषयितायाः साक्षा
ज्जनकतावच्छेदकतामते जनकतासु वर्णत्वव्याप्यजातिनिरूपितावच्छेदकताख्यविषयिताव
च्छेदकत्वानिरूपितत्वमेव निवेश्यं। तावतैव वर्णविषयितानिरूपितजातिप्रकारितावच्छे
दकसकलजनकताव्युदासात्। एवं च तथाविधाया जनकतातत्तदवच्छेदकयत्किंचिज्ज्ञानीय
विषयिताश्रयवर्णवृत्तिसमुदायत्वनिवेशान्न एवोपपत्तेस्तादृशविषयताश्रयवर्णत्वव्यापक
त्वमपि न निवेश्यमिति महालाघवमिति चेन्न। एवमपि पक्षाद्यवच्छिन्नप्रकारितानिरूपितत्वेस्य
त्पक्षाद्यवच्छिन्नविशेष्यितानिरूपिताव्यवहितोत्तरत्वावच्छिन्नसांसर्गिकविषयिताशालिनिर्ण
यत्वावच्छिन्नजनकतायां विनिगमनाविरहजन्यायास्तादृशायावदंततया तज्जनकतावच्छेदक ॥११॥

विषयताश्रयवर्णप्रसिद्ध्याऽसंभवापत्तेः। एवं चावच्छेदकतावच्छेदकतासाधारणावच्छेदकताजा
त्यावैवकोटिप्रविष्टत्वमुक्तं। तद्घटकसकलवर्णविषयितानामेवावच्छेदकत्वान्न दोषः। अविशिष्टत्वं रूपपर्याप्त्य
यदि च जातिनिष्ठावच्छेदकत्वनिष्ठतादात्म्यावच्छेदकत्वानिरूपकत्वे सति सांसर्गिकविषयितानिष्ठसाक्षा
दवच्छेदकत्वानिरूपिकाया जनकतायास्तत्तदवच्छेदकयत्किंचिज्ज्ञानीयविषयताश्रयवर्णवृत्तिसमु
दायत्वनिवेशेनैवोपपत्तौ तादृशवर्णत्वव्यापकत्वनिवेशवैयर्थ्यमुक्तं तेन तादात्म्यजन्यतानंतरत्वा
न्तदोषः इति। अत्र सकलवर्णविषयितानां साक्षादेवावच्छेदकत्वं न त्वेकमवच्छेदकमन्यत्तदवच्छेदक
मिति मते तस्यार्थासिद्धिकरणविषयतावत्त्वाप्रसिद्धेरतः प्रविविक्तमप्याहुः। अथ तथाविधसक
लकारणतावच्छेदकविषयितानिरूपकवर्णत्वव्याप्यत्वे स्वव्यापकतादृशवर्णत्वकत्वं वा विवक्ष्यतां
न्यायत्वाश्रयस्य सकलकारणतावच्छेदकविषयितावत्त्वान्न दोष इति चेत्तदासंभवं कल्पयेति यत्तु अ
वच्छेदकत्वानुपादाने फलोपधानरूपजनकतोपादाने समानानुपूर्वीकेऽस्मादिदोषाप्रसरेऽपि न्यायां
तरविषयकसरूपं यत्किंचिज्ज्ञाने निवेश्यं। एवं च न्यायत्वविषयकज्ञानकारणतादृशवर्णत्व

तत्कारणतावच्छेदकविषयितानिरूपकवर्णत्वाभावकूटवद्वृत्तित्वे तूक्तातिव्याप्तिः

ग॰आ॰ समनैयत्यपक्षेपि समंजसः। न च न्यायजन्यतो न्यायत्वे अवशेषात् न्यायत्व इति वाच्यं तावदर्थवि
१२ षयकशाब्दबोधीयसकलकारणतावच्छेदकयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वं तत्त
विषयकत्वस्य तदर्थत्वादिति तच्चुच्छम्। प्रतिज्ञोत्तरहेतुत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वादिरू
पानुपूर्व्या अव्यापकत्वात्। समु— दायत्वविशेषस्य तथात्वेपि। स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्त
रत्वसम्बन्धेनहेत्वादिवृत्तिसमुदायत्वनिष्ठत्वविशेषणेन न्यायद्वयत्वादिवारणा। किंचोदासीनप्रतिज्ञैक
देशन्यायोत्तरसमुदायत्वमुदासीनप्रतिज्ञान्यायोत्तरसमुदायत्वं चादायातिव्याप्तिः न्यायमात्र
विषयकयत्किंचिज्ज्ञानस्यैव यत्किंचित्तदुत्तरज्ञानघटितत्वात् तादृशावर्णत्वस्य तादृशसमुदायत्व
संभवात्। यदपि स्वसमानाधिकरणत्वे त्प्रतियोगितावच्छेदकत्वमात्रत्वं नवृत्तित्वं। सामानाधि
करण्यं निवेशप्रयोजनाभावात्। न चैवमसंभवः यज्ज्ञानीयतादृशतत्तत्कारणतावच्छेदकविषयता
श्रयवर्णत्वव्यापकसमुदायत्वनिष्ठस्वनवृत्तित्वानिरूपकसंबंधसमुदायत्वे तादृशतत्तत्कारणताश्रय
वर्णत्वव्यापकत्वस्य विवक्षितत्वात्।। पूर्वदले ऽवच्छेदकत्वनिवेशान्न्यायोदासीनसमुदाये नातिप्रसंगः।। घटमानयेति वाक्योत्तरघटेति ।।१२।।
+ एवैकन्यायघटकवाक्यपंचकवृत्तिसमुदायसमाहायासंभवात् पर्याप्तिनिवेशे तद्विवक्षावैयर्थ्यात्।।

यदि च दलद्वयेपि यद्यज्ज्ञानत्वं तत्तज्ज्ञाने वीप्सांकृत्वा ऽवच्छेदकत्ववैयर्थ्यमुच्यते यद्यदर्थोत्तरत्वे न्यायमा
त्रज्ञानमादायातिप्रसंगवारणात् तदा महागौरवम्। यत्तु सामानाधिकरण्यघटितमूनवृत्तित्वप्रवेशो
पि तस्य प्रतिज्ञादिसाधारणतयाऽसंभववारणाय तादृशसमुदायत्वे तन्निवेशं तादृशसमुदायत्वस्य
न्यावृत्तित्वे वाऽनिरूपकं तार्थः तत्र चानेकत्रसमुदायत्वनिवेशेगौरवात् समनैयत्यमेव सम्यगिति त
न्न। असंभववत्वेन तादृशविषयतान्यतमविषयताश्रयनिवेशे न्यायोदासीनप्रतिज्ञासमुदायेऽति
व्याप्तेरिति तच्चुच्छं यादृशन्यायव्यक्तिज्ञानोत्तरं न कस्यापि शाब्दबोधः। तदसंग्रहाय स्वरूपयोग्यताया
एव निवेश्यत्वाज्ज्ञानान्तरविवक्षावैयर्थ्यात्। न्यायोदासीनप्रतिज्ञासमुदायेऽतिव्याप्तेरनुद्धाराच्च।
यज्ज्ञानशब्देन तथाविधसमुदायज्ञानस्यैव धर्तुं शक्यत्वात्। यत्तु समनैयत्यपक्षे शाब्दबोधेयत्किंचि
त्वविशेषणेन न्यायद्वयादिवारणे स्वाव्यवहितोत्तरोत्पन्नोहिज्ञानं तेन ग्राह्यम्। तच्चैवैकन्यायार्थ
ज्ञानमेवेति न्यायद्वयाद्यर्थबोधप्रसंगः तदाचार्याणामयमेवाशय इति तच्चुच्छम्। एवमपि न्यायो
दासीनप्रतिज्ञोत्तरसमुदायेऽतिव्याप्तेरुत्तरीतेरावश्यकत्वेन्यायद्वयादौ दोषस्यैवाप्रसरात्।।

ग.आ. यज्ज्ञानमाहायव्यापकत्वं तद्व्यवलिङ्गिविज्ञानमाहायापरत्वानिवेशात् इयच्छेदकत्ववैयर्थ्यमि
ति तत्तुच्छतरम्॥ न्यायमात्रज्ञानमाहायव्यापके न्यायोदासीनसमुदायेस्वज्ञानमाहायापर
त्वसत्वात्। यत्त्ववच्छेदकत्वोपादाने पि उदासीनधर्मिकन्यायत्वत्रमादेवशाब्दबोधस्तन्न्यायेन्या
१३ यत्वेन तद्घटविषयितायाः अप्यवच्छेदकत्वात् व्याप्तित्रमात्मत्वनिवेशो पि दुर्वारः एवं यत्र घटध
र्मिकन्यायत्वत्रमादेवशाब्दबोधस्तत्र न्यायत्वऽनिरूपकत्वो लासत्वेनाव्याप्तिरिति तन्न। तथाहि
धन्याये मानाजावदिति कतं पद्मयितेना इदं तु बोध्यम्। स्वाश्रयीन्तूतप्रतिज्ञाव्यवहितोत्तरत्व
मत्वे स्याद्दे प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीमत्त्वमि
त्वं प्रतिज्ञात्वम्। अन्यथा वह्निमान् पर्वत इति वाक्यधर्मिकपर्वतो वह्निमानित्यानुपूर्वीज्ञानमा
हायमुक्तमोत्वर्णसमुदायरूपप्रतिज्ञोतरत्वादेहेतोदोसत्वेनातिव्याप्तेः आनुलोम्योन्यत्वेन
वारणेपितादृशसमुदायरूपचरमवर्णोत्तरत्वादिनिवेशापानात्। आनुपूर्वीपदमवच्छेदकता
पर्याप्तिनिवेशार्थम्। एवं साध्यविशिष्टपक्षबोधमयोग्यहेतुविशिष्टहेतुत्वबोधकं हेतुत्वं तत्र

॥१३॥

प्रतिज्ञाघटकहेतुर्थबोधकत्वोपगवारणाय प्रकृतपक्षविशेषणतापन्नसाध्यान्वितताद्दशहेतु
त्वविषयितानिरूपबोधजनकतावच्छेदकप्रकारताश्रयत्वेसति ताद्दशहेतुत्वेतरविषयितानिरूपबो
धजनकतावच्छेदकप्रकारताश्रयीभूतायानुपूर्वीमत्त्वमिति पूर्वितं। तेन निगमनव्युदासः
एवं प्रकृतसाध्यं व्याप्तिविशिष्टप्रकृतहेतुमत्पक्षबोधं साध्यव्याप्यादिवत् प्रकृतहेतुविशिष्टहेतु
त्वविशिष्टप्रकृतसाध्यविशिष्टपक्षबोधं निवेश्यक्रमेणोपनयनिगमने बोध्ये। न च नोदाहरणवा
रणकारणतयोर्निवेशव्युत्क्रमोक्तमागघटितोदाहरणघटितसमुदायेऽतिव्याप्तिरिति चेन्न। धू
मवान् धूमव्यापकवह्निमानित्याद्याकारकबोधे योग्यधूमवान् सवह्निमानित्याद्यानुपूर्वीप्रका
रकज्ञानत्वेनैव हेतुत्वात् हेतुविशिष्टधर्मिबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्व्यैवच्छिन्ना
व्यवहितोत्तरसाध्यविशिष्टधर्मिबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीमत्त्वं तत्। ए
वं व्यतिरेकोदाहरणस्थलेऽपि ह्यम्॥ न तु ताद्दशाकारणता विशिष्टताद्दशाकारणे तेन निवेश्या
त्वाद्यवात् वैशिष्ट्यं च स्वसामानाधिकरण्यस्वावच्छेदकविषयताश्रयवर्णाव्यवहितोत्तरवर्णा

विषयतावच्छिन्नत्वेन तत्संबंधेनेति चेत्तर्हि यो यो धूमवान् स वह्निमानित्यादिपूर्ववर्त्तिज्ञानानुपूर्व्याः तद्
वच्छेदकप्रकारतानाश्रयत्वात् कथं कारणतद्घटितत्वं समुदायवारणमिति। यदि च पर्वतो वह्निमा
नित्यादिप्रतिज्ञायां यो यो धूमवान् स स वह्निमानित्यादिके नोदाहरणे तत्प्रतिज्ञाघटसाध्योपस्था
पकतावच्छेदकानुपूर्वीभिन्नसाध्योपस्थापकतावच्छेदकानुपूर्वीमद्वृत्तित्वं न्यायत्वे निवेश्य
म्। एतच्च विभिन्नानुपूर्वीकेनार्थोपस्थापकार्थपदसमुदायघटितन्यायस्यालक्ष्यत्वमभिप्रे
त्य तस्यापि लक्ष्यत्वे तु धूमादित्यनन्तरं स धर्मी पर्वतो वह्निमानित्याद्युदाहरणादिसाधारण
समुदायवारणाय तद्यदप्रतियोग्यानुपूर्व्या अघटितपक्षोपस्थापकतावच्छेदकाप्रविष्टत्वं
देयम्। तत्रैव वह्निपदघटितोदाहरणादिघटितस्यातिव्याप्तिः प्रतिज्ञायास्तादृशानुपूर्वीभिन्न
साध्योपस्थापकतावच्छेदकानुपूर्वीमत्त्वात्। ततः तेद्दानुयोग्यानुपूर्व्या प्रतिज्ञोत्तरप्रविष्टत्वं वि
शेषणम्। एवं हेतुघटकहेतूपस्थापकतावच्छेदकानुपूर्वीभिन्नाविशेषितहेतूपस्थापक
तावच्छेदकानुपूर्वीमद्वृत्तित्वं निवेश्यम्। अपि वोषितोपादौ नातस्माद्वह्निमानिति

निगमननिर्वाहः। धूमाद्वह्निमतः सधर्मी पर्वतो वह्निमान्धूमादित्यादिन्यायस्य लक्ष्यत्वे तदनुयोग्या
नुपूर्व्या प्रतिज्ञोत्तरप्रविष्टत्वं विशेषणम्। पर्वतो धूमाद्वह्निमान् धूमात् इत्यादौ यो यो धूमवान् स धूमा
द्वह्निमानित्युदाहरणादिघटितस्य संग्रहाय तत्रैव यो यो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटि
तस्य च वारणाय प्रतिज्ञाघटकसाध्योपस्थापकतावच्छेदकानुपूर्व्या अप्रविष्टत्वं तत्रैव निवेश्यम्॥ तच्च ता
दृशसाध्यतावच्छेदकप्रकारताशाब्दोपस्थितिजनकतावच्छेदकतापर्याप्त्यधिकरणप्रकारतानाश्रय
त्वम्। अत एव तत्र यो यो धूमवान् स धूमाद्वह्निमानित्युदाहरणादिघटितस्यापि व्युदास इति। धूमा
द्वह्निमानिति च निगमनं॥ धूमपदे व्याप्यादिविशिष्टे लक्षणाऽसंगात्॥ एवं यो यस्तद्वानिति नोदाह
रणं। विशेषणपरामर्शिद्यापत्तेः संप्रदायविरोधाच्चेति॥ छ तदुपाप्येति निगमनप्रतिज्ञयोः सं
ग्रहाय प्रतीकद्वयम्। तेन द्वितीयकस्यानुसरेणेन। समूहालंबनमिति द्वाधिकारो कर्द्दोषो दुरापं।
अन्यथा वेति। महावाक्यार्थबोधो यथा प्रकृतमूलाप्ये इत्यग्रे स्फुटं। अनास्थायांवाकारः न्यायार्थबोध
परामर्शयोरंतराज्ञानानां वाह्निविशिष्टे व्याप्तसंगतिरतो व्याचष्टे विशिष्टेति। ताहशीया अनेनेति व्युत्प

ग.आ. तिमत्तिजेत्य। अंतरपदं स्वरूपपरं। उक्ताप्यतेइत्यस्योक्ताद्यलइतिनार्थो मनसोनित्यत्वादि
त्यत आह स्वात्मकेति॥ स्वं तत्तद्वाक्यार्थविषयकज्ञानं। तेनेति। केवलमतः परामर्शकत्वे। संगति
१५ स्तस्य परामर्शानुत्पादकत्वादितो व्याचष्टे। तेनेति। तदेव तत्तद्वाक्यार्थविषयकज्ञानमेव नतर्हि तयोप
नयः किमिति प्रयुज्यत इत्यत आह व्याप्येइति। आकांक्षितं जिज्ञासितं। तदृसत्वे नेति। उपनय
वाक्यजन्यव्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शासत्वेनेत्यर्थः। न चोपनयार्थबोधोत्तरनिगम
नार्थावगाहित्वायार्थबोधएवसंगच्छतीति कथमेतदितिवाच्यं। निगमनार्थविशिष्टोपनयार्थ
स्यविधेयत्वेविधेयतावच्छेदकज्ञानविधया निगमनार्थज्ञानस्यापेक्षणात्। उपनयार्थशा
ब्दबोधोत्तरं निगमनश्रवणेन तद्घटकपदार्थोपस्थित्यैव — पनयार्थबोधनाशाच्च। नचतावत्य
र्यतं तदृसत्वेपि महावाक्यार्थबोधेऽवांतरवाक्यार्थबोधस्य कारणत्वे तदनुरोधेनोपनयार्थस्मर
णस्यैव कल्प्यतीयतया ततएवानुमितिनिर्वाहे परामर्शोत्तरस्वीकारोऽनुचित इति वाच्यं। तथा
प्यंशेउद्बोधकेन कल्प्यते इत्याशयः। समाधानं तु तदंशे पोषस्याप्रामाणिकत्वमनुरूप्य बाध ॥१५॥

कत्वादिति। अवांतरवाक्यार्थबोधएवसामग्री अपेक्षिता महावाक्यार्थबोधस्य संगतसामग्री का
वांतरनानावाक्यार्थबोधाधीनएवेतिपुनरानेवादितात्पर्यापेक्षाशंकानवकाशः। मिश्रास्तु समाधानमाह
वादीति। वादीतिसाधारणधर्मोक्तिः एवमप्रमाणशंकानेयत्रेमानाभावाद्व्यवच्छिन्नपरामर्शवैयर्थ्यं
दुर्वारमेवेत्यस्वरसः स्वसंमतं समाधानमाह न्याय्यत्वेति। न्यायार्थज्ञानस्यहेतोर्व्याप्त्यप्रकारकत्वात्। हेत्वि
त्यादिना मानसानुधावनम्। तेनवह्निव्याप्यधूमवानयमितिवाक्येन तत्र परामर्शजनकत्वाभ्युपगमे
ऽपि तत्रापि धूमः पक्षेपर्वतेनवेत्येवाकांक्षा। तथाचायमित्येवोपनय इति व्याप्तिपक्षधर्मतयोर्वि
शिष्टत्वमेव ज्ञानमितिवदतां मतमाह सुहृदिति। अत्रस्वयं न्यायलक्षणमाहेति जागदीशीयावता
जा रणमसंगतं मूलेदर्शितताया एवसंगतत्वात् उपाध्यायप्रभृतिभिस्तस्यैवानुरोधाच्च लघुलक्षणां
तरासत्वेन मौलन्यायलक्षणस्य दुःसंगतत्वात्। अथवा तत्र न्यायलक्षणमित्यस्य पर्यवसितन्या
यलक्षणमित्यर्थ इत्याशयेनाह। अत्रेति। पंचकेति। शाब्दज्ञानानां जनकानीतिव्युत्पत्तेः नचैतावता
बोधपंचकजनकपंचकवाक्यसमुदायत्वेमन्यार्थः। नतु प्रतिज्ञादिपंचकसमुदायत्वमितिशंक्यं

ग॰ आ॰
९५

यो प्रतिज्ञादिपंचकसमुदायत्वमित्यत्र प्रतिज्ञादिपंचानां प्रतिज्ञात्वादिनैव निवेशितत्वात्त
त्प्रतिज्ञादिकं न तत्स्वार्थबोधजनकवाक्यस्वरूपमेवेति मूलार्थ एवोक्त इत्याह-प्रतइति। उ
चितानुपूर्वीकत्वं तु पूर्वितदोषविलिकारेण। सामान्यतो बोधनिवेशे घटमानयेति वाक्येऽति
व्याप्तिः स्यादत-आह प्रयोजकांतं चेति। न तु परामर्शप्रयोजकशाब्दस्यत्र शाब्दपदस्य पंच
बोधपरत्वे प्रतिज्ञादिपंचवाक्येरित्यादिमूलासंगतिः एकबोधाजननेपि कुरीत्या पंचबोधा
नादायलक्षणगमनसंभवादित्याशयेन शंकनेयद्यपीति। उपाध्यायोक्तलक्षणे क्वचिदेकज्ञाना
जननेऽतिर्गहो व्यंजितः एवमिति चूमते स्वार्थविशिष्टज्ञानमित्येकत्वानुपपत्तिं परिहरति। सं
जवेति। पंचार्थक एकबोधे परामर्शप्रयोजकतोपपादनेऽर्थात् पंचानां बोधानां तदुपपादितं
त्ववतीत्यभिप्रायेणेत्यर्थः॥ इत्यभिप्रेत्य। ननु तत्स्यलक्षणे प्रवेशः सकालइतिलाघवमभि
प्रेत्य। उचितानुपूर्वीकः प्रतिज्ञादिपंचसमुदायो यत्रेति विग्रहे तस्य व्यादिसमुदायानतिरि
क्ततया तत्रातिव्याप्तेराहेवेति। समुदायत्वस्य धर्मत्वेनैव निवेशउचितः। अन्यथोच्चारण

॥९६॥

भक्तिभेदेन न्यायभेदादनुगतलक्षणानुपपत्तेः॥ अनुगतसमुदायत्वेन निवेशे प्रयोजना
भावात्मनानाभावाध्येस्त्यभिप्रेत्य यत्समुदाय इत्युक्तम्। नन्वेवम्। स्वतन्त्रतादेः कथं वारणमित्यतः
पर्याप्तिप्रवेशयति तादृशेति। स च धर्मोऽर्थात् समुदायत्वमेवेति स्फुटयति समुदायत्वमिति। एवं
सति पंचपदोपादानं सार्थयति पंचपदमिति विशिष्य प्रतिज्ञात्वादिना सर्वांतरेण निवेशेऽति
व्याप्तेः एतेन वोक्तनामलेष्वावयवकस्य मीमांसकानां अवयवकस्य प्राचीननैयायिकानां द
शावयवकस्य वारणाय पंचपदमित्यपास्तं उत्तरेति। अत्र वहितरेत्यर्थः प्रतिज्ञोत्तरवाक्योत्त
रहेत्वादित्रिगमनां नोत्तरप्रतिज्ञादेस्त्ववारणाय तयोर्निवेशः॥ न च स्वाधिकरणकालध्वंसाधि
करणकालध्वंसाधिकरणत्वसामान्याभावरूपमव्यवधानं न हेत्ववयवघटकस्य तस्य प्रतिज्ञा
धिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वादिति वाच्यं। स्वाधिकरणकालध्वंसाधि
करणकालध्वंसाधिकरणता संबंधेन प्रतिज्ञासामान्याभावस्य निवेशत्वात् स्वत्वानिवेशो
पि अन्याधिकरणता या अन्यसंबंधत्वाभावेन सामान्याभावनिर्वाहात् संबंधे सामान्यरूपस

ग.आ. शावेपि तद्वृत्तित्वप्रतियोगितावच्छेदकतानैव स्यात्॥ वस्तुतस्तत्पूर्वपूर्ववर्णानंतर्यविशिष्टच
रमवर्णत्वरूपानुपूर्वीरूपं प्रतिज्ञात्वं। तस्य पर्वतोवह्निमान्वा न पर्वतो वह्निमानित्यादिवाक्यभेदेन
१८ भिन्नत्वेपि पक्षे साध्यवैशिष्ट्यावगाहिबोधजनकतावच्छेदकप्रकारकाश्रयत्वमनुगमकं। आनं
तर्यं च स्वोत्पत्त्यधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणकालोत्पत्तिकध्वंसप्रतियोगित्वा
त्मवृत्तित्वं ध्वंसाधिकरणत्वं च ध्वंसोत्पत्त्यधिकरणरूपं तेन नोक्तदोषः स्वध्वंसाधिकरणक्ष
णोत्पन्नध्वंसप्रतियोगिक्षणवृत्तित्वं वा। स्वेतादृशप्रकारताश्रयधर्मवत्त्वं। एवं तादृशप्रकारता
श्रयधर्मत्वेव हेतुत्वादि तत्र निरूप्यत्वं निरूकानंतर्याश्रयवर्णघटितत्वं निवेश्यम्॥ तादृशानं त
र्यवत्तितादृशधर्मवत्त्वादिरूपहेतुत्वं वा। आनंतर्यवत्त्वं च स्वाश्रयवर्णघटितप्रकृतधर्मवत्त्वसं
बंधेन आनुपूर्व्यं तरस्य प्रकृतप्रवेशः हेत्वादेर्ज्ञानानुत्तरत्वात् अतएव तत्र तत्राये तथाविधानु
पूर्वीविशेषितितथाविधविशेषपदयोरुपादानमितिबोध्यं। निगमनएव विशेषान्तेतितथाविध
मयं चेच निगमनपदं निगमनघटकांत्यवर्णपरं। यत्तु प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगा

॥१९॥

बोधजनकतावच्छेदकत्वरूपं चिद्विषयताश्रयवर्णसमुदायत्वं प्रतिज्ञात्वं एवं हेतुत्वादिकं निवा
च्यं अत्र च निगमन एव विशेषान्तेति यथाश्रुतमेव रमणीयं। अत्र प्रतिज्ञादिघटकचरमवर्णानं
तर्यं न निवेश्यं तच्च चरमवर्णाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति
तदधिकरणकालध्वंसाधिकरणत्वं परं तु तत्र स्वघटकवर्णप्रागभावासमानकालीनत्वे
सतितथावधत्वविशिष्टत्वं वा चरमत्वानानिवेश्यं विशिष्यतदधिकरणकालनिवेशेनैवोपप
त्तेः हेत्वादिघटकानां पूर्ववर्तिप्रतिज्ञाविषयकज्ञानध्वंसाधिकरणकालध्वंसाधिकरणतया ता
दृशप्रतिज्ञाधिकरणकालध्वंसविषयकज्ञानाधिकरणतया चाव्याप्तिरतः कालस्यनिवेशइति
तन्न विशिष्यनिवेशेननुगमात् चरमत्वनिवेशे गौरवात्। प्रतिज्ञाघटकचरमवर्णध्वंसोत्पत्ति
कालोत्पत्तिकहेत्वादिघटितन्यायसंज्ञवेतुन्याश्रयप्रतियोगिकस्वाश्रयासमानकालीनध्वंसाधि
करणकालध्वंसानधिकरणत्वरूपमव्यवधानं निवेश्यं। स्वप्रतिज्ञात्वादिरूपसमुदायत्वं। तेनप्र
तिज्ञाघटकाद्यादिवर्णध्वंसाधिकरणकालस्पर्शध्वंसाधिकरणत्वेपिनदोषइत्याप्याहुः। प्रति

ग॰आ॰ शाब्दे ऐक्ये ज्ञानभेदेन विषयिताभेदेपि प्रतिज्ञाविषयितात्वेनानुपूर्वीविषयिताव्यापकत्वं
स्यादतः शाब्दव्यक्तिभेदेन भिन्नत्वोत्कीर्तनं। यादृशयादृशानुपूर्व्यवच्छिन्नयाव्यविषयितात्वं याद
१८ शयादृशविषयितात्वेनानानुगतमिति भावः। यादृशानुपूर्वीकप्रतिज्ञोत्तरं यादृशानुपूर्वीकहे
त्वंतरेत्यादि। क्रमेणोचितानुपूर्वीति विशेषणं न्हि दृहनादिशाब्दघटितानुपूर्वीभेदेन शाब्दव्यक्तिभेदे
नैयायिकभेदप्रसंगः। अग्निमद्वित्यादिव्याप्तिश्चयस्कुतठहासान प्रतिज्ञादिपंचकेऽतिव्याप्तिवार
णाय तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वमेव व्यापकत्वं निवेश्यं। एतेनानुपूर्वीविष
यितासामान्यनिवेशापदेशेप्रतिज्ञादिविषयितासामान्यस्य व्यापकतया शाब्दव्यक्तिभेदेनैव संग
तमेवेति निरस्तं तथापि उत्तरकृत्ये ज्ञानभेदेन विषयिताभेदासत्वेऽगतिः एतत्कृत्ये तु तदनुपग
मे विषयभेदे विषयिताभेदास्वीकारे संगतेरिति बोध्यं। यत्किंचिदिति विषयिताविशेषणं। तादृशेति।
व्युत्क्रमोक्तेत्यर्थः क्रमप्रयुक्तव्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकोत्तरसमूहालंबने आनुपूर्वीविषयक
त्वव्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयकत्वयोः व्याप्यव्यापकभावः ज्ञानभेदेन विषयिताभेदात्के

॥१८॥

वलन्यायज्ञाने समूहालंबनज्ञानीयन्यायानुपूर्वीविषयिताविरहादित्यर्थः। नैवमिति। तस्याए
वक्रमोक्तमानज्ञानेपि सत्वात्तत्र व्युत्क्रमोक्तप्रतिज्ञादिविषयिताविरहान्नातिव्याप्तिः। तादृशेपि।
व्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकसमानाधिकरणन्यायघटकानुपूर्वीविशिष्टप्रतिज्ञादिसमुदाय
वाद्गगनमिति व्युत्क्रमोक्तप्रतिज्ञादिपंचकसमानाधिकरणे न्यायविशेष इति वाज्ञानीयेत्यर्थः।
आदिना समानकालीनत्वादिपरिग्रहः। समानाकारकज्ञाने विषयितयोरैक्येपि समानाधिक
रण्ये विशेष्यकत्वावच्छिन्नानुपूर्वीघटकारितारूपा उक्तज्ञानीयविषयिता। तथाविधज्ञानीयन्याय
घटकप्रतिज्ञादिपंचकविषयितालोभिन्नैव वह्निमान्पर्वत इति ज्ञानविषयिताघटकसमाना
धिकरणे वह्निमान्पर्वत इत्यादिज्ञानविषयितावत्तस्याप्युक्तसमूहालंबनन्यायवत्तः याः के
वलन्यायज्ञानेऽभावात्व्युत्क्रमोक्तप्रतिज्ञादिसमुदायेऽव्याप्तिरिति भावः। न च तादृशानुपूर्वी
पर्याप्तिनिरूपकताकयत्किंचिद्विषयितानिवेशान्नायं दोष इति वाच्यं आनुपूर्वीमात्रविषयताया
अपर्याप्तेः। न च तत्पर्याप्त्यवच्छेदकताकनिरूपकताकविषयितानिवेशः यत्किंचिदिव घटितत्वेना

ग॰आ॰ त्विगुरुत्वात् इति भावः। एतेन यादृशविषयिता त्वेयत्किंचिदानुपूर्वीविषयकत्वसमानाधि
१९ करणाभावप्रतियोगितावच्छेदकं तादृशविषयिताशून्यज्ञानीयत्वं व्याप्यत्वान्न तु विषयितायो
देयमिति पास्तं। न एतत्पक्षेऽभावस्यानिरूपितेदेन प्रतिज्ञादेर्भिन्नत्वाच्चाजननात् न्यायेनासंभवात्।
यत्किंचित्त्वनिवेशेन गौरवाच्चानुपूर्वीकत्वं आनुपूर्व्याश्रयत्वं तच्च विशिष्टनिगमनत्वरूपाया
नुपूर्वीत्वाश्रयत्वरूपं निगमनत्व एव विश्रान्तमित्यनेन दूषितम्॥ इदानीं तु यथा विशिष्टनिगमनत्वं
तथैव विशिष्टप्रतिज्ञादीति निदिश्य पंचविधायानुपूर्व्या तदा तद्दृशानुपूर्वीकत्वं प्रत्येकं वक्तु
शक्यमित्याशयेनाशंकतेऽथेति। पूर्वेति। अव्यवहितपूर्वेत्यर्थः। तदुत्पत्तिक्षणोत्पत्तिकध्वंस
प्रतियोगित्वमेवन्त्विति। उपनयघटकचरमवर्णोऽत्र तन्निगमनत्वेनेवोत्तरोत्तरवर्णपूर्वत्ववि
शिष्टाद्यवर्णत्वं तस्य प्रकारताविशेषाश्रयधर्मत्वेनोक्तः स्यान्निवेशः। आनुपूर्वीति वेशानुरो
धोद्घटकनिगमनत्वादिनांसमुदायत्वपर्यवसन्नानोत्थानः उदासीनप्रतिज्ञान्यायान्तरगत
क्रमिकहेत्वादिसमुदायवारणायोचितानुपूर्वीकप्रतिज्ञानिवेशः एवमुचितानुपूर्वीकहेत्वादि

॥१९॥

निवेशफलमूह्यम्। वस्तुमात्रदोषेणैव निरसनीयं कस्मात्तरमाह। अथवेति। पूर्वपंचानुपू
र्व्यंशकाऽस्तत्रेदानीं यदृच्छयैकैकनिवेशे पत्तिदर्शयति एकविधेति। एवमपीति। न चैतत्प्रतिज्ञोत्त
रैतद्धेत्वादिघटितभेदप्रतियोगितावच्छेदकत्वमस्तु। तत्पक्षसाध्यहेतुकन्यायाननुगमप्र
संगात् यत्तु एवमपि तन्न्यायघटकप्रतिज्ञायाप्यतादृशभेदप्रतियोगितावच्छेदकत्वं तथैवाप
रन्यायघटकहेतोरपरापरन्यायघटकोदाहरणादेरिति नोक्तातिव्याप्त्युक्तासंभवः। तादृशैकभे
दप्रतियोगितावच्छेदकत्वव्याप्यधर्मत्वमित्यपि देयं। तदसमुदायन्यायोपनयभेदवारणाय। न च त्वा
स्पष्टप्रवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिताविशेषणं न्यायत्वं चानुपूर्वीरूपमिति न तद्भेदासंग्र
ग्रह इति वाच्यं। नानान्यायान्तर्गतप्रतिज्ञादिसामानाधिकरण्येन विशिष्टन्यायभेदवारणात्। नव
तादृशानुपूर्वीतरानवच्छिन्नप्रतियोगिताभेदनिवेशासंभवः न्यायभेदस्य तादृशेतरप्रतिज्ञात्वाद्य
वच्छिन्नप्रतियोगिकत्वादिति तन्न तादृशैकभेदनिवेशपतन्नाऽवच्छेदकतापर्याप्तिसाधनात्तद्युक्त
दोषवारणात्॥ स्वाश्रयेति। प्रतिज्ञायां यत्किंचिदानुवैपर्याप्तिरुक्ता। यत्तु पाश्चात्यनिष्कर्षे नावद्यथि

ग.आ. पयकबोधस्य निविष्टतया द्वलद्वयेपि यत्किंचिच्छाब्दबोधपदेन न्यायद्वयार्थशाब्दबोधमुपा
दाय न्यायद्वयेऽतिव्याप्तिरतस्तद्वारणाय तद्विशेषणे यत्किंचित्वं प्रतिज्ञाद्यवयवपंचकमित्यत्र यत्किं
२० चिच्छाब्दबोधपदेनैकन्यायार्थबोधऽपादीयते न वा न्यायद्वयेऽतिरूपकत्वोतेन वारणं। अंत्येऽसंगतो
न्यायत्वेन व्यापकत्वस्य दुरुपपादत्वात्। तथा च तत्रापि यत्किंचित्वं व्यर्थमिति चिंत्यं कुर्वन्तु॥ तात्पर्या
दिति। उचितानुपूर्वीकत्वादेरित्यादिः एवं चेत्ति। नन्वत्र संदर्भे विरोधो दुर्वारः तादृशात्वेदप्रतियो
गितावच्छेदकत्वनिवेशात्मपिप्रतिज्ञादिपंचकैकदेशावृत्तिसमुदायत्ववारणाय प्रतिज्ञाद्यादि
पर्याप्त्यवच्छेदकयत्किंचिद्धर्मपंचकव्यापकत्वरूपविशेषणस्य सार्थकस्यावश्यकत्वात्। असंग
तत्वं येन तादृशात्वेदप्रतियोगितावच्छेदकवर्णत्वव्यापकत्वनिवेशासंगतवादितिचेत्। अत्र केचित्॥
तादृशात्वेदप्रतियोगितावच्छेदकत्वस्यावच्छेदकतावच्छेदकसाधारण्यस्य सामान्यिकत्वेन तादृशा
नुपूर्वीप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकयत्किंचिज्ज्ञानीयविषयितानिरूपक
वर्णत्वाव्यापकसमुदायत्वनिवेशेनैवैकदेशावृत्तिसमुदायत्ववारणे प्रतिज्ञादिपंचकवृत्तित्ववैयर्थ्य

॥२०॥

र्थ्यासंभवात्तदुपपत्तिसम्भवात् नैवं चेत्यादिकथनासंगतिः। यत्तु वर्णत्वस्य कत्वादिरूपतया ता
दृशात्वेनिश्चयत्वसमनियतकारणतावच्छेदकविषयितानिरूपकवर्णान्यत्वमहत्वसमनियतत्वस
मुदायत्वं विवक्षितं। एवं च विशेषणद्वलवैयर्थ्यान्न संदर्भविरोधः। अनिरूपकत्वांततु न विशेष्यं।
एवमपीत्यतिप्रसंगापत्तेः। यत्तु ज्ञानुपूर्व्या मध्यवर्धामांशनिवेशेप्रयोजनाभावाद्धेतुवाच्यत्व
घटितं तादृशानुपूर्वीप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकविषयताश्रये कोवन्हि
मान्पर्वतो वन्हिमान् कुतो धूमादित्यादिवाक्यसमुदायेऽतिव्याप्तिरतो जिज्ञासादिविषयता
प्रयोजकत्वेन वर्णे विशेष्य इति तन्न। एवमपि घटमानयेत्यादिवाक्यं तरितप्रतिज्ञाहेत्वादिघ
टितसमुदायेतिव्याप्तेरिति तदसत्॥ वर्णत्वादेः कत्वादिरूपतामते पि उत्तरत्वादिसंसर्ग
कनिश्चयं निवेश्य वर्णपदस्य संसर्गतासजातीयवृत्तिविषयतामात्रनिवेशे पर्यवसितया तद्व्या
पकत्वनिवेशेनैवोपपत्तावन्यतमत्वव्याप्यत्वांशयोर्निवेशवैयर्थ्यात्॥ उक्तरीत्याऽसंगतत्ववार
णाय यत्किंचित्त्वव्यापकत्वे सति तद्व्यक्तरूपस्यैव निरूपकत्वांतार्थस्य निवेशनीयतयैव

ग॰आ॰ मपि साध्यंशसंगतेः वस्तुतस्तु तथाविधसाध्यघटकप्रतिज्ञात्वादिरूपयत्किंचिदानुपूर्वीविशेषा
२९ वच्छिन्नभेदप्रतियोगितावच्छेदकत्वविशिष्टवर्णत्वव्यापकत्वसमुदायत्वनिवेशात् विशेष्यदल
वैयर्थ्यमिति। पूर्वं प्राचीनोक्तविशेषणांशवैयर्थ्यं घटमानयेत्यादिवाक्येऽतिप्रसंगस्यैवाभावादि
ति तेषां तदभिधानासंगतिः पंचकैकदेशसमुदायवारकं च विशेषणं नास्तीति न्यूनतेति पूर्व
पक्षिणश्च। इदानीं तेषां तदभिधानसंगतिः तादृशसमुदायवारकविशेषणस्यैव चैतद्ग्रन्थमतेनि
प्राचीनोक्ताभिप्रायलिखनमात्रमन्यथा एवं चेति पंचकैकदेवनैरर्थ्यं स्यादित्यनुपपन्नम्। अत्र एकै
कन्यायघटकत्वात् द्वावयवापरन्यायघटकप्रतिज्ञाद्यानंतर्यावगाहिसमूहालंबनविषयत्वसमनि
त्वावच्छिन्नजन्यतायाः साध्यविशिष्टपक्षशाब्दत्वव्यभिचारित्वात्। अत एव तादृशजन्यत्वभिन्नभिन्नविष
यकज्ञानत्वादिसाधारण्यवारणाय कार्यतावच्छेदककोटौ शाब्दत्वनिवेशान्न तत्कार्यतायास्तादृशा
शाब्दत्वव्यभिचारित्वेनासंभव इति तन्न। शाब्दत्वनिवेशेपि भूतलं घटवदित्यानुपूर्वीपर्वतो वह्नि
मानित्यानुपूर्वीज्ञानोत्तरं भूतले घटः शाब्दबोध एव प्रतिबंधकवशेन च पर्वते वह्निः शाब्दबोधोत
जातस्तत्र कार्यतासत्वेनासंभवात्॥ यद्यपि समानासमानानुपूर्वीकसमानार्थकप्रतिज्ञाजन्यता
यां तथाविधहेतुधीजन्यतादेश्च वैलक्षण्यं। स्वीकृत्य न तत्तदर्थशाब्दबोधवृत्तिविलक्षणजन्यता
न्यतमनिवेशः कार्य इति तन्तुच्छं। कार्यतावच्छेदकधर्मावच्छेद्यत्वादृष्टतेस्यजन्यतावैलक्षण्यस्या
प्रामाणिकत्वात् अन्यथा जगति तत्तद्यावंतो न्याया दृष्टवो ध्वास्तत्र जनतावैलक्षण्यमादाय न्या
यादेरनुगतत्वापत्तेः तादृशेति। अत्रैकदेशार्थबुद्धित्वावच्छिन्नजनकतावारणाय पूर्वोक्तजन्यता

ग.आ. स्वत्वमन्यत्वानिवेशो बोध्यः अथ तादृशजनकताश्रयपदं किंचिज्ज्ञानविषयवर्णसमुदायत्वमेव
४१ वास्तु किमवच्छेदकत्वोपादानेन यत्किंचित्त्वनिवेशेनैवास्यैकमवयवव्यवहारोपपत्तेः यत्तु र
वंसतिप्रतिज्ञाहेत्वेकदेशसमुदाया यावतिव्याप्तिः तज्ज्ञानस्य तथाविधजनकताश्रयशून्यत्वात्॥
ज्ञानावच्छेदकविषयितायां तथाविधजनकतावच्छेदकत्वस्य निवेशपरतया तद्विशिष्टतादृशज
नकताशून्यत्वाच्चेति अवच्छेदकत्वमुक्तमिति तन्न तादृशसमुदायत्वस्यैव निरवच्छिन्नत्वानिरू
पकत्वं निवेश्यैव तत्फलस्यायवाहयितुं शक्यत्वात्। मैवं। तादृशान्यत्वमको धस्यरूपयोग्यावयवसं
ग्रहायावच्छेदकत्वनिवेशात्। केचित्तु अवच्छेदकत्वानुपादाने पर्वतो वह्निः संबंधात्ति निराकांक्ष
वाक्ये तादृशवर्णत्वसमनियतसमुदायत्वपर्यंतोक्तौ नुत्वच्छिन्नसमुदाये ऽतिव्याप्तिः ज्ञानाव
च्छेदकतथाविधजनकतावच्छेदकविषयिताशून्यप्रतिज्ञाविषयकत्वद्विषयकज्ञानविषय ॥४१॥
त्वात्। न च तादृशप्रतिज्ञात्वाश्रयनिराकांक्षोत्तरहेतूत्तरे साध्यानुपूर्वीविशेषावच्छिन्नेतरप्रति
योगितावच्छेदकत्वस्य निराकांक्षे सर्वे चोक्ता विशिष्टपदत्वबोधकतावच्छेदकविषयितापदि न

मुचितानुपूर्वीकत्वं निवेश्यं तथा चोक्तनिराकांक्षस्य न्यायांतर्गतत्वाज्ञानवाधादरणेऽपि सावच्छेदकत्वनिवेशो
नैतीनावश्यं। एवमुचितानुपूर्वीकघटकहेतुत्वाद्विशारदे। अवच्छेदकत्वनिवेशाप्रयोजकैवत्वनिवेशो
लाघवादित्याहुस्तन्न अवच्छेदकत्वाघटितोचितानुपूर्वीकत्वनिवेशेऽतादृशसोवतिव्याप्तेः। न्यूनत्वनिराकांक्ष
स्येह त्वादिकाद्यानुपूर्व्यांऽविच्छेदात्। इदं तु बोध्यं। तथाप्यवयवैकदेशवारणाय तादृशवर्णत्वव्याप
कत्वं निवेश्यं। एवमपि प्रतिज्ञाहासिनसमुदायेऽतिव्याप्तिः। न्यायांतर्गतत्वेन तद्वारणमिति चेत् प्रति
ज्ञाहेतुघटकरत्नसमुदायत्व माहायातिव्याप्तिः। अनिरूपकत्वां तेन वारणं चेत् नहि तथाविधजन
कताश्रयशून्यत्वादिवैपरीत्यमिति पदपि वर्णसमुदायत्वस्यैकदेशेसत्वात् वर्णत्वसमनियतसमु
दायत्वं निवेश्यं तन्न प्रतिज्ञाहेतुसमुदायत्वादेस्तथाविधजनकताश्रयशून्यत्वादिमात्मज्ञानविषयत्व
र्णत्वव्यापकत्वादतिव्याप्तिरतो व्याप्यत्वं न निवेशः। एवं च व्याप्यदिति तथाविधजनकताशून्यत्वा
दिवैपरीत्येऽपि व्यापकद्विति तत्कार्यं सं। एकस्यैव वर्णत्वांत निवेशाच्चैतत्सार्थक्यमिति तद्व्याप्यस
त्वा अनिरूपकत्वां निवेशेनैवोपपत्तौ व्याप्यत्वांत निवेशस्य तथाविधजनकताश्रयशून्यत्वादिना

ग॰आं॰ र्थकस्य वायुत्वकत्वादिति। न चातिरूपकत्वांतनिवेशे हेत्वर्थबोधकत्वागघटितत्वप्रतिज्ञायामव्याप्तिः
४२ प्रतिज्ञात्वस्य धूमादिति न्यायस्थत्ववत्तिहेतु त्वविशिष्टन्यूनवृत्तित्वनिरूपकत्वादिति वाच्यं। अवयवघट
कतावच्छेदकीभूतयत्किंचित्तादृशानुसंदायस्यैव समानाधिकरणभेदप्रतियोगितावच्छेदकत्वे
सतितद्भिन्नत्वस्यैव निरूपकत्वांतार्थत्वात्। यद्वावयवघटकतावच्छेदकीभूतांतेनदेयं। नापि हे
तुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयकत्वावच्छिन्नजन्यतानिरूपकत्वं नद्दलेनिवेश्यतेति
ष्प्रयोजनत्वात् प्रतिज्ञैकदेशहेतूनयत्वकारणंतु विशिष्य तत्समुदायत्वभेदनिवेशपेवत्तावता
नापि लाघवानपायात्। अपितु दाहरणसंग्रहापनिकलयत्किंचित्तादृशसमुदायत्वनिष्टन्यूनवृ
त्तितानिरूपकत्वे समुदाहरणत्वभिन्नत्वे निरूपकत्वांतार्थ इत्यलं पल्लवितेन। नन्वेवमपि पर्वतो
धूमवान् ज्ञाप्यवह्निमानिति बोधमादाय प्रतिज्ञाहेतुसमुदाये अतिव्याप्तिरत आह तादृशेति।
व्याप्यव्यापकतानावापन्नतथाविधजनकताद्वयत्वं च यत्किंचित्तादृशजनकतात्वान्याश्रयवृत्ति ॥४२॥
त्वस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकस्योभयसंबंधेन तद्विशिष्टतादृशजनकतोभयात्वं

एतद्विशेषणं च पर्याप्त्युपादानेपि उन्मत्तमते नानुवादजन्यतानिरूपितजनकतावच्छेदकविषयिता
त्वेनविषयितामादाय प्रतिज्ञाहेत्वादिसमुदायवारणाय वक्ष्यमाणमितितन्निवेशे पर्याप्त्युपादा
नेन प्रयोजनं वस्तुते। तत्तत्कारणविषयितावच्छिन्नजनकतादायासंभवावारणाय तथाविधपदं। नन्
नूदाहरणे कथं न तत्समन्वयः तज्ज्ञानस्य व्याप्यव्यापकभावापन्नतादृशजनकताद्वयशालि
त्वात्। मैवं उदाहरणार्थबोधीयजनकतासमुदायान्यत्वेन तादृशजनकताद्वयस्य विशेषणीयत्वात् हेतू
दाहरणसमुदायादौ च हेत्वर्थबोधजनकतोदाहरणार्थबोधीयजनकतैतद्वयस्य तादृशसमुदाया
न्यत्वेन नातिप्रसंगः। यद्वा तथाविधयत्किंचिज्जनकत्वतदन्याश्रयवृत्तित्वसमानाधिकरणभेदप्र
तियोगितावच्छेदकतथाविधजनकतोभयशून्यत्वकूटं व्याप्यव्यापकभावेति निवेशार्थः। तन्त्रा
व्याप्तिकरडन्यायाभावेन घटकः स्वानवच्छेदकत्वे सत्याप्तिमद्विशेषणे चोदाहरणार्थबोधीयजन्यते
द्वित्वेननिवेश्यतदापतदापजनकतात्वे न जनकते उपादेये इत्यनन्यव्याप्यव्याप्तिः। स्वानवच्छेदकेति
तादृशहेत्वादिविषयितासमानाधिकरणायाः प्रतिज्ञाज्ञानत्वावच्छिन्नजनकतायाः केवलप्रति

ग॰आ॰
४३

ज्ञादिज्ञाने सत्त्वादृशं तत्त्वमिति विशिष्टपदं ॥ अथ प्रतिज्ञाहेतुविषयकसमूहालंबनस्य विशिष्ट
जनकताश्रयत्वात्तात्त्वेन प्रतिज्ञादेः कथं तत्र लक्षणगमनमिति चेत् यत्किंचित्त्वस्य ज्ञानविशेषणतया
प्रतिज्ञामात्रविषयकं एव ज्ञानमादायेति निगूहः ॥ अथ प्रतिज्ञाहेतुसमुदायेति व्याप्तिवारणाय स्वानव
च्छेदकविषयिताविशिष्टजनकताश्रयत्वस्य ज्ञानविशेषणं धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ
ज्ञा प्रतिज्ञायामव्याप्तिः तादृशप्रतिज्ञाज्ञानस्यापि धूमादित्वानुपूर्व्यवच्छिन्नज्ञानत्वावच्छिन्नजनकतावत्त्वात् । ता
दृशजनकत्वस्य निरुक्तान्यतमजन्यतानिरूपितत्वात् स्वानवच्छेदकीभूतलपर्वतादिपदविषयिताकत्वा
च्चेति चेन्न तादृशान्यतमजन्यतानिरूपिताया जनकतायाः स्वानवच्छेदकविषयिताविशिष्टतादृशजनक
ताश्रयत्वज्ञानाय स्वानवच्छेदकविषयितानिरूपकवर्णसमुदायसमर्थः तादृशज्ञानाय च स्वावच्छेदकौ
त्रयसंबंधेन जनकताविशिष्टविषयितेति वाच्यं ॥ तथा च स्वपदं यज्जनकताव्यक्तिमादाय यल्ल
क्षणसमन्वयः कर्तव्यस्तत्परं ॥ एवं च धूमादालोकवान् पर्वतो वह्निमानित्यादित्यादिप्रतिज्ञाज्ञान ॥४३॥
त्वावच्छिन्नाया जनकतायास्तदवच्छेदकविषयिताविशिष्टतादृशजनकताश्रयत्वं प्रतिज्ञाज्ञानस्यास्ते

वेति लक्षणसमन्वयसंगतत्वान्नानुपपत्तिः अन्यतमनिरूपितजनकतामात्रपरत्वे तु ज्ञानज्ञाप्यत्वं
धूमीयमिति बोधजनकताया अपि तथात्वेन तदनवच्छेदकीभूतपर्वतो वह्निमानिति ज्ञानविषयिता
विशिष्टजनकतावत्त्वेन तादृशप्रतिज्ञाज्ञानासंग्रहापत्तेः । नन्वात्र तादृशविषयिताश्रयत्वमेव निवेश्य
तां किं तादृशजनकताप्रवेशेनेति वाच्यं । तथा सति तादृशान्यतमजन्यतानिरूपितजनकतावच्छेदक
त्वरूपविशेष्यदलवैयर्थ्यापत्तेः । अस्माकं तु एकदेशज्ञानस्यापि तादृशान्यतमजन्यतानिरूपितजन
कतानवच्छेदकविषयिताविशिष्टतादृशजनकताश्रयत्वादेकदेशवारकतयैव तद्दलस्यार्थवत्त्वात् ॥
अन्यथा परस्परनिरूप्यनिरूपकतापन्नसकलविषयितानां तादृशजनकतावच्छेदकत्वेनैकदे
शमात्रविषयकज्ञानीयविषयिताया अन्यथात्वेन जनकतानवच्छेदकतया तत्रातिव्याप्त्या ता
द्विशेष्यदलवैयर्थ्यापातात् । अत एव तादृशपदमप्यावश्यकमन्यथा एकदेशज्ञानस्यापि तादृश
विषयिताविशिष्टयत्किंचिज्जनकताशालित्वेन तद्दलवैयर्थ्यापातात् । यत्तु तादृशविषयिता
श्रयत्वनिवेशे विषयिताया अव्याप्यवृत्तित्वेनावर्तकत्वमिति जनकत्वोपादानं विषयिता

ग·आ· विशिष्टजनकत्वं च नाव्याप्यवृत्तिनिर्दोष इति तत्पदं तथासत्ति प्रमेयत्वसाधारणतादृशवि
४४ षयिताविशिष्टत्वं निवेश्य लघुत्वस्यैव निवेशेनोपपत्तेस्तादृशजनकतापर्यन्तनिवेशवैयर्थ्य
स्य वज्रलेपत्वात्॥ एवं च ज्ञानत्वस्विकरूपेण तादृशजनकतावच्छेदकनिवेशोऽसंभवः वैशिष्ट्यावच्छि
न्नतादृशजनकतावच्छेदकनिवेशे तु तादृशजनकत्वे व्यर्थमिति दूषणमस्वरससमाधानेवेति बोध्यं।
नन्वेवं स्वानवच्छेदकविषयिताशतत्वस्यैव सम्यक्त्वे विशिष्टजनकतावच्छेदकत्वनिवेशोऽनतिप्रयो
जन इति चेत्तर्हि प्रकृतिमद्दूषणगणनमध्ये एतद्दूषणस्यापि गणने का क्षतिः। परे तु स्वत्वस्यानु
गतत्वनयान प्रतिज्ञामादायैवानुगतलक्षणनिर्वाह इति स्वानवच्छेदकविषयिताविशिष्टतादृशजन
कतात्वकं यद्यत्त्वं तत्तद्भावकूटवत्त्वमेव ज्ञानेन निवेश्यं तादृशं च प्रतिज्ञाहेतूनयज्ञाना
दौ प्रसिद्धं तत्र च हेतुज्ञानत्वावच्छिन्नजनकतानवच्छेदकत्वं तु तदन्यत्वं तु स्वस्यैतिन धूमवदालो
कवान् पर्वतो वह्निमानित्याद्यप्रतिज्ञायामव्याप्तिः। एवं च जनकत्वनिवेशखंडनमप्रसक्तमेवे
त्याहुः। नह्यपि नातिव संदर्भं सुदृढं प्रतिजातिः इदंशारीरस्यैव प्रतिज्ञाहेतुसमुदायादिवारणे कर्तव्ये ॥ ६४ ॥

विशायकशाब्दत्वपर्याप्त्यवच्छेदकत्वे तन्निवेशस्य व्यर्थतापत्तेः अस्मन्मते तु प्रतिज्ञाहेतुज्ञान
त्वावच्छिन्नजनकत्वे स्वपदेनोपादायत्वलक्षणसमन्वयसंभावनावारणाय पर्याप्तिनिवेशानमाव
श्यकं स्वत्वाननुगमदोषस्तु यत्किंचित्वदेतत्त्वघटनेऽस्वरससमाधानेवेति। अत्र वदन्ति। प्रतिज्ञैकदेशा
हेतुघटितसमुदायवारणाय पर्याप्तिनिवेशनमावश्यकं। अन्यथा तासमुदायत्वे हेत्वर्थविषय
कशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितायास्तद्विषयकज्ञानत्वावच्छिन्नजनकतायास्तदवच्छे
दकविषयितानिरूपकवर्णवृत्तित्वस्य वह्निमत्पदविषयितायाश्च प्रतिज्ञैकदेशहेतुज्ञानत्वाव
च्छिन्नजनकतावच्छेदकतया ज्ञानेन तादृशजनकत्वाभावकूटवत्त्वस्य च सत्त्वेनातिव्याप्तेः पर्याप्तिनि
वेशे च हेत्वर्थविषयकशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यताकजनकताकजन्यताकजनकता
हे हेतुज्ञानत्वावच्छिन्नैव तदन्यस्यानवच्छेदकवह्निमत्पदादिविषयिताविशिष्टत्वघटितजन
कताशतत्वप्रसक्तज्ञानीयतदवच्छेदकविषयितानिरूपकवर्णसमुदायत्वसत्त्वेन नातिव्याप्तिः
रौ एवं धूमवदालोकवान् पर्वतो वह्निमानित्यादौ धूमवदालोकवान् पर्वत इत्यादिन्यायेऽतिव्याप्तिः
धूमवदालोकवान् पर्वत इति न्यायज्ञानत्वावच्छिन्नजनकतायाः हेत्वर्थविषयकशाब्दत्वघटित

गा॰आ॰ धर्मावच्छिन्नजन्यतानिरूपितत्वेन तज्ज्ञाने तादृशजनकत्वाभावकूटवत्त्वस्य सत्त्वेन च तन्न तदवच्छेदकवि
४५ षयितानिरूपकवर्णसमुदायत्वस्य लाभादिति। अत्र तथापि प्रतिज्ञैकदेशो धूमादित्यादिस्तत्रातिव्याप्तिः। त
त्र हेत्वर्थविषयकशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यतानिरूपितजनकतानवच्छेदकविषयितानिरूप
कवर्णसमुदायत्वसत्त्वात् तज्ज्ञाने तादृशजनकत्वाभावकूटवत्त्वस्य सत्त्वाच्चेति नयचार्याणामस्वरस
संगतिरिति। न च स्वानवच्छेदकविषयितावच्छिन्नतायां तत्तदर्थविषयकशाब्दत्वनिष्ठावच्छेदकता
कजन्यतान्यत्वमजन्यतानिरूपितजनकतानवच्छेदकविषयितानिरूपकवर्णसमुदायत्वमेव
समुदितार्थः। तन्नविशेष्यदले पर्याप्तिर्न प्रवेशयते किन्तु या जनकतावच्छेदकविषयितामादायलक्ष
णसमन्वयः। पर्याप्तिघटितार्थकजनकतां स्वपदेनोपादाय तस्यां तदनवच्छेदकविषयितान्यत्वमपे
क्षितं। तथा च हेत्वर्थविषयकशाब्दत्वघटितधर्मावच्छिन्नजन्यतानिरूपितैतज्जनकतावच्छेदकवि
षयितायास्तद्विषयकशाब्दकपर्याप्त्यवच्छेदकताकजन्यतानिरूपितजनकतानवच्छेदकीभूतत्व
न्यायोऽजोकादिमत्पदविषयितान्यत्वाभावात् [illegible]तिव्याप्तिरिति एवं सत्यनुपपन्नः प्रतिज्ञाहेतुवि ॥४५॥
षयितेऽपादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिस्तु तदवस्था। स्वानवच्छेदकविषयितान्यत्वकूटनिवे

शात् विषयिता यज्ज्ञानवृत्तिस्तद्वृत्तिर्या जनकता स्वपदेन तस्या एवोपादानात् प्रतिज्ञाविषयि
त्वादेहेतुज्ञानत्वाद्यवच्छिन्नजनकतामादायाव्याप्तिरिति वाच्यं। तस्य लक्षणान्तरत्वात् प्रकृतल
क्षणपरिष्कारकत्वे स्वपदेन प्रतिज्ञार्थविषयकशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यतानिरूपित
जनकत्वे च हेतौ लक्षणगमनाय हेत्वर्थविषयकशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यतानिरूपितजन
कतायाः उपपादपतया हेतुज्ञानत्वावच्छिन्नाजनकतातत्प्रवेशयते किन्त्वन्यच तुष्टयीत्यस्यासंग
तेः। फलत एवात्र स्वपदेन हेतुज्ञानत्वावच्छिन्नाजनकतागृहीते तथा च स्वानवच्छेदकत्वोकप
दादिविषयिताविशिष्टहेतुज्ञानत्वावच्छिन्नजनकतावत्त्वेन तादृशज्ञानस्य न कूटवत्त्वाभावाद
व नातिव्याप्तिरिति पर्याप्त्युपादानं व्यर्थमिति समाहितं। स्वशब्देन हेतुज्ञानत्वावच्छिन्नजनकत्व
स्योपादाने धूमवत्त्वोकयानूपर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तेश्च। तज्ज्ञानस्य हेत्वर्थवि
षयकशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यतानिरूपितजनकतानवच्छेदकपर्वतपदादिविषयि
ताविशिष्टजनकतावत्त्वात् तादृशाकूटाभावादिति। यदि च स्वानवच्छेदकेति स्वशब्देन प्रत्येकं ताद

ग.आ. शजनकतापंचकमपि गृह्यते। हेतुज्ञानत्वावच्छिन्नजनकतानग्राह्येति तु यथाश्रुतहेतुज्ञानेऽन्वये
४८ ण योज्यते। न चैवं निरुक्तप्रतिज्ञायामव्याप्तिः तज्जन्यशाब्दबोधस्य विवक्षितहेत्वर्थाविषयकत्वात्
तथा च न कोऽपि दोष इति विभाव्यते तदा प्रतिज्ञैकदेशहेतुज्ञानादिवारणात्। स्वानवच्छेदकत्वादि म
हाचार्योक्तविशेषणवैयर्थ्यं इष्टापत्तिरिति मन्तव्यं। ननु यथाश्रुतमते स्वानवच्छेदकत्वे स्वानतिरि
क्तवृत्तित्वं न त्वं तथा च हेतुज्ञानत्वावच्छिन्नजनकोपादानेऽपि प्रतिज्ञाविषयतायास्तदनतिरिक्तवृ
त्तितया तद्भिन्नविषयिताविशिष्टजनकत्वाघटितकूटपक्षतामिति चेत्तर्हि हेतुविषयिता
याः प्रतिज्ञाजनकतातिरिक्तवृत्तित्वादव्याप्तिरितिनिदिक्। यत्तु स्वस्य स्वधर्मितावच्छेदकत्वा
देन यत्प्रतिज्ञाज्ञानेऽपि त्वादिप्रकारतानिरूपितविशेष्यतायाः अभ्युपगमे तादृशप्रकारतायाः
स्वानवच्छेदकविषयितात्मिकायाः शून्यत्वविरहेण प्रतिज्ञायामव्याप्तिः जनकतावच्छेदे निवेशो
वावच्छिन्नत्वसंबन्धेन तद्विशिष्टत्वाभावान्न दोष इति तदसत्। अवच्छिन्नत्वसंबन्धेन तादृशविषयि
षयितावैशिष्ट्यस्य निवेशे यदि चेत्यादिग्रंथविरोधात्। उदासीनपदार्थविषयितायाः स्वानव ॥४८॥

च्छेदकत्वेऽपि तादृशजनकत्वस्य तदनवच्छिन्नतया अव्याप्तियोगेन विषयितायां तादृशान्यतमजनक
तावच्छेदकत्वनिवेशस्यात्यन्तमफलत्वापत्तेरिति। यादृशप्रतिज्ञादिज्ञानमुदासीनपदार्थविषय
कमेव जायते तादृशप्रतिज्ञादिव्यक्तावव्याप्तिमाशंक्य यदि चेति समाधत्ते नन्वित्यादिः। एवं च स्वा
नवच्छेदिकाया तथाविधजनकतावच्छेदकविषयिताया तद्विशिष्टतादृशजनकताशून्यत्वं स्वज्ञानवि
शेषणमित्यर्थः। अत्र स्वानवच्छेदकतादृशजनकतावच्छेदकविषयिताशून्यत्वमेवास्तु भागविषयिताया
स्तादृशजनकतावच्छेदकत्वेन तत्रातिव्याप्तेर्विशिष्यदलसार्थक्यसंभवादिति तु बोध्यं। अनतिरिक्तेति।
इदं चानालोचनायं स्वानवच्छेदकविषयिताविशिष्टस्वन्यूनवृत्तितादृशजनकताशून्यत्वसंगतिः। ननु प्रा
न्नोक्तव्याप्तिस्याद्दो हेतुज्ञानत्वावच्छिन्नजनकतायाः स्वन्यूनवृत्तित्वाभावेन प्रतिज्ञाहेत्वन्यतमज्ञानसंग्रहे
पि तदीयप्रतिज्ञाज्ञानत्वावच्छिन्नजनकताया एव स्वपदेनोपादानात्तदवच्छेदकविषयितोपादाना
न प्रतिज्ञायामव्याप्तिः। एवं च भट्टाचार्योक्तं स्वानवच्छेदकविषयितायां तथाविधेति विशेषणं हेयमे
वापंचानामप्यवयवानां विषयिता नैयत्योपगमे तु स्वन्यूनवृत्तिजनकतावस्थाने स्वन्यूनवृत्तिः स्वा

ग॰ आ॰ त्ववच्छेदकविषयितानिवेश्या वस्तुतस्तु स्वानवच्छेदकेत्यादिकमपहाय स्वाश्रयत्वस्वसमानाधिक
रणत्वेदप्रतियोगितावच्छेदकविषयिणोऽन्यथानावच्छेदकत्वेन ज्ञाने विशेष्यं। स्वानवच्छेदकत्व तथाविधज्ञ
४० नकतावच्छेदकविषयितानिरूपकत्वेन वा वर्णो विशेषणीय इति। अस्समानाकारकप्रतिज्ञाद्वयेज
न्यतात्वेदमते दोषाप्रसक्तेः समानेति। इत्थमेवेति। एकप्रतिज्ञा प्रतिज्ञाद्वयमिन्नेतिप्रत्ययसे ज्ञेवे
पितावयव इति प्रत्ययाभावात्। तस्मात्तथा चे। प्रतिज्ञाद्वयस्यावयवत्वास्वीकारे परिचिंतनीयइ
ति प्रतिद्वयस्यालक्ष्यत्वोपगमे तादृशसमुदायत्वनिष्ठन्यून। वृत्तिता निरूपकत्वे देयं मिथ्यत्वे प्रायः।
नत्वेतेनैव प्रतिज्ञाहेतुसमुदायातिव्याप्तिवारणे स्वानवच्छेदकेत्यादेर्वैयर्थ्यप्रसंग इति चेदित
त्वत्वे दुष्टत्वात्। अत्रापेतदाचार्याणामाशयः प्रतिज्ञैकदेशावृत्तिसमुदायत्वं वारणाय तादृ
शायत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वसमनियतसमुदायत्वनिवेशान्न प्रतिज्ञाहेतुस
मुदायादावतिव्याप्तिः। स्वास्वानवच्छेदकेत्यादिविशेषणवैयर्थ्यं प्रतिज्ञाद्वयादिवारणाय तत्समु ॥४७॥
दायवृत्तित्वमेव निवेश्यं। न चैवं स्वनिष्ठन्यूनवृत्तितानिरूपकत्वसंबन्धकवर्णत्वसमनियतस्य

निवेशे नातिव्याप्तिं संपाद्य स्वानवच्छेदकेत्यादेस्तत्समुदायत्वभिन्नत्वस्य च प्रवेशो महागौरवादिति
तथा सति धूमादालोकवान्नित्यादिप्रतिज्ञायामव्याप्तेः प्रतिज्ञानिष्ठसमुदायत्वे धूमादितिज्ञानमा
त्र धीवृत्तिकत्वसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वसत्त्वात्। उदाहरणनिष्ठसमुदायत्वस्य
तदेकदेशावृत्तित्वाविधयत्किंचित्समुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वादव्याप्तेश्च। इत्थं चा
वच्छेदकत्वनिवेशनमपि सार्थकं। अन्यथा हेतुप्रतिज्ञैकदेशज्ञानस्य स्वानवच्छेदकतादृशान्यतम
ज्ञत्वतानिरूपितजनकतावच्छेदकविषयिताविशिष्टजनकताशून्यतया तत्समुदायेऽतिप्रसंगात्
एवं च प्रतिज्ञाद्वयादेर्लक्ष्यतापरः स्वानवच्छेदकेत्यादिविशेषणप्रदत्तया तत्त्वद्वारणवत्तदज्ञस्यता
यां वारणं भवतीति। यदि च तत्तदर्थशाब्दत्वपर्याप्त्यवच्छेदकताकजन्यताभ्यतमजनकताश्रययत्
किंचिज्ज्ञानविषयवारणत्वव्यापकसमुदायत्वं वाच्यं तन्न च पूर्वोक्तस्वनिष्ठन्यूनवृत्तितानिरूपक
त्वमात्रं निवेश्यं प्रतिज्ञाद्वयादिकं चालक्ष्यं। नियतावयवद्वयज्ञानं चाप्रामाणिकं तदवच्छेदकत्वे जन
कताद्वयशून्यत्वादिकं तत्तत्समुदायत्वभिन्नत्वं च व्यर्थमिति ध्येयं। यत्किंचित्त्वं एकमात्रवृत्तिधर्मस्त
था चाधेयतासंबंधेन ज्ञानीय एकमात्रवृत्तियो धर्मस्तद्विशिष्टाया स्वाधिकरणयत्किंचिद्वृत्तित्वसं

ग॰ आ॰

५८

वंधेन ज्ञानत्वविशिष्टस्य विषयितायावात्तिवेशान्तदोषः वस्तुतस्तु ज्ञानप्रयवर्णविशिष्टताशत्
त्वतादृशजनकतावच्छेदकविषयितापालिज्ञानकसमुदायत्वेयत्किंञ्ज्ञानपदगर्भवाक्यार्थएवमे
वप्रतिज्ञादिपर्याप्तिवच्छेदकयत्किंचिद्धर्मपंचकव्यापकत्वमित्यत्रापिप्रतिज्ञात्वादेर्यत्किंचित्वगर्भत्वेन
स्वावच्छेद्यपर्याप्तिकप्रतिज्ञात्वकधर्मविवक्षयाऽननुगमोद्धारः अन्यथायत्किंचित्प्रतिष्टत्वादिधर्म
पंचकव्यापकत्वमेवब्रूयात् इत्यतआह एवमिति। त्रागेधूमादजोकवान्नितिप्रतिज्ञाघटकधूमा
दित्यत्र। ननुपर्वतोवह्निमानितिप्रतिज्ञाघटकपर्वतापदेतत्मात्रज्ञानस्यतथाविधजनकतानां
श्रयत्वादतउक्तंहेतुर्थेति। प्रतिज्ञादित्यादिना। धूमाद्वह्निसाध्यकोदाहरणादिपरिग्रहः। तन्वचा
साध्यविशिष्टपक्षविषयिताघस्यतमनिष्टप्रयोज्यतानिरूपितप्रयोजकतावच्छेदकयत्किंचिद्वि
षयिताकवर्णसमुदायत्वेवाच्यंतत्रचप्रकृतपक्षविशेषणतापन्नसाध्यान्वितप्रकृतहेतुवि
शिष्टहेतुत्वविषयितानिवेशान्नप्रतिज्ञादिघटकहेत्वर्थबोधकनागोऽतिव्याप्तिःयद्विषयताशालि
ज्ञानोत्तरंदृशापिवस्तुतस्तादृशसाध्यविषयतानिरूपितायाहेतुत्वविषयतानघालिकार्यानुदयः
तत्तुरूपविशेष्यतायास्त्वपितादृशहेतुत्वविषयतोप्रतियोजकत्वासंभवात् तादृशविषयता

सिद्धान्तलक्षणजागदीशीटीका ॥५९॥

तादृशसाध्यविषयतानिरूपितत्वोपलक्षित

शालिबोधेप्रतिज्ञोत्तरहेतुत्वादवनहेतुत्वेपिहेतुत्वावयवस्यतत्प्रयोजकत्वंहेतुत्वार्थविषयताप्रयोजकइतिव्य
वहारात्हेतुविषयतायांसाध्यादिविषयित्वानिरूपितत्वंदेयंतेननिगमनघटकतस्मात्पदेनातिव्याप्तिरित्यत
आह। एवमिति। वाक्यद्वयात्मकस्येतिवाक्यचतुष्टयात्मकस्येत्यर्थः सपक्षतावच्छेदकावच्छिन्नेहेतुसमभ्यवैशि
ष्ट्यावगाहिशाब्दत्वपर्याप्तावच्छेदकताकजन्यतार्थसमाजकप्रबाधकेननिराकरोति। तादृशार्थद्वयेति। द्वि
त्वेनेति। उदाहरणघटकवाक्यचतुष्टयविषयकप्रत्येकज्ञानचतुष्टयनिष्ठजनकता आदायतन्निष्ठचतुष्टया
वच्छिन्नत्वेदस्येवाम्यतमत्वकुतौनिवेशात्तादृशजनकताचतुष्टयावच्छेदकविषयितानिरूपकवर्णसमुदा
यत्वस्यसंपूर्णएवसत्वानेकदेशेऽतिव्याप्तिरिति भावः यद्यपिद्वित्वेननिवेशेपिवाक्यचतुष्टयसमुदायस्यसं
ग्रहः तथापितथानिवेशेनस्वराव्यद्वयवृत्तिसमुदायत्वनिष्ठमूतवृत्तितानिरूपकत्वमितिचतुष्टयानुधा
वधं। दुर्वारत्वादिति। अन्यतमत्वस्याव्यासज्यवृत्तित्वापर्याप्तिविवक्षया असंभवात्। इदंतुबोध्यम्। त
थाविधजनकतावच्छिन्नेतरान्यतमत्वभेदप्रतियोगितावच्छेदकधर्मपर्याप्तावच्छेदकविषयितेनता
त्कनेएवनिवेशउदाहरणैकदेशेनातिव्याप्तिःजनान्यतमत्वोदाहरणप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धिजन
कताद्वयभेदनिवेशादितिननुपादिनिरूपितत्वेपुनयघटकतागद्वयाघटितत्वस्यकदेशसाधारणतया
तिव्याप्तिर्दुर्वारैवेत्यतआह पूर्वेति। नन्वदाहरणत्वस्यदुर्वचतयाकथंतद्देशत्वानुयोगितावच्छेदकत्वमित्या

ग॰ आ॰ शयेन शंकनेन चेति दुर्वचमिति। इत्यत्र वयवानन्वितस्वार्थबोधकत्वं नेहोदाहरणत्वमात्राश्रयात्। अ
तः व्याप्यवान्तिमनवन्तिर्व्यापकवान्तिमत्संबंधबोधकत्वमुदाहरणत्वमिति मूलोक्तलक्षणं परि
४९ ष्करोति स्वघटकेति। स्वं वाक्यं। स्वघटकयस्य हेतोपस्थाप्यतावच्छेदकदृष्टांतत्तावच्छेदकधर्मावच्छिन्ने
दायच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोधजनकतावच्छेदकत्वेनयवदा प्र
कारताश्रयानुपूर्वीघटकवर्णत्वव्यापकसतितदाश्रयाधिकरणकालध्वंसोत्पत्त्यधिकरणक्षणध्वं
सोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वगर्भवृत्तिवर्त्तिस्वघटकतत्पदोपस्थाप्यतावच्छेदकदृष्टांत
वच्छेदकधर्मतदवच्छिन्नत्वेदावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यप्रकारताद्वयशालिशाब्दबोध
जनकतावच्छेदकप्रकारताश्रयानुपूर्वीघटकवर्णत्वव्यापकसमुदायत्वमित्यर्थः। समानुपूर्वीमहा
नसत्वचत्वरत्वादिनासेतुतादृशत्वेहानुयोगितावच्छेदकावच्छिन्नविशेष्यतानिविशेष्यतोनिनव
स्वघटकवत्पदोपस्थाप्यत्वेप्यर्थः। महानसस्सत्वह्निमान्धूमवानित्यादावतिव्याप्तेः एवं तत्पदोपस्थाप्यत्वो
नानुपादानेमहानसस्सत्वह्निमान्वह्निमानित्यादावतिव्याप्तिर्बोध्या। नचसत्वनिवेशानिबंधनेऽननुगम
इतिवाच्यं। प्रकृतहेतुप्रकारतानिरूपितसपक्षतावच्छेदकाद्यवच्छिन्नविशेष्यताप्रयोजकयत्सदृघटितत्वद
वच्छिन्नजनकतावच्छेदकताद्वयवत्प्रकारताश्रयानुपूर्वीत्वादिक्रमेणनिवेशान्तर्वचितानुपूर्वीकहेतु ॥४९॥

साध्यविशिष्टधर्मिकबोधकद्वयकसमुदायत्वमप्येतदेव। यद्यपिप्रकृतहेतुविशिष्टतदन्यप्रकृतसाध्य
विशिष्टतत्तदन्यधर्मिविषयकसमूहालंबनबोधीययावत्कारणतावच्छेदकयत्किंचिद्विषयताश्रयव
र्णत्वव्यापकसमुदायत्वमुदाहरणत्वं संभवति तथापि सवह्निमान्। यो यो धूमवान्निति वाक्यस्य वारण
यस्ताश्रयीभूतसाध्यविशिष्टबोधकवाक्यवहितोत्तरहेतुविशिष्टबोधकवाक्यवृत्तियत्समुदायत्वं
तद्भिन्नत्वनिवेशगौरवात् नोक्तं। इदं तु बोध्यं। स्वघटकयत्तत्पदोपस्थाप्यधर्मिणि यो हेतुमत्वबोधः पक्ष
हेतोस्तादृशधर्मिबोधस्तदन्यतरबोधजनकं यद्वाक्यं यच्च तदनंतरप्रयुक्तं स्वघटकतत्पदोपस्थाप्यध
र्मिणि साध्यवत्ताबोधः पक्षसाध्ये तादृशधर्मिबोधस्तदन्यतरबोधजनकं यद्वाक्यं तदुभयत्वमुदाहर
णं तेन यत्र धूमस्तत्राग्निरित्युदाहरणे नाव्याप्तिः पाकृत्तलीतरत्वेहादौ साध्ये न तु। वस्तुतस्तु धर्मिवि
षयतानिरूपितहेतुविषयताकत्वेन बोधयोरनुगमः तत्र धर्मिविषयतायां हेतुतावच्छेदकसंबंधा
वच्छिन्नप्रकारतासत्त्वनिवेशाद्धूमोयद्वानिति बोधस्य हेतुविषयतायां हेतुतावच्छेदकसंबंधान
वच्छिन्नप्रकारतासत्त्वनिवेशाद्धूमोयोयइति बोधकस्य च व्युदासः। एवं साध्यवत्ताबोधके सवच्छिन्ना
न्तसाध्यतावच्छिन्नावच्छेदकसंबंधानवच्छिन्नप्रकारकात्वं विषयितयोर्विशेषणमिति विशेषः यो
योधूमवान्स तत्र वह्निरित्यादेर्वारणीयत्वेतु तत्समुदायत्वे नेहोनिवेशः सत्तुपसत्ताप्याद्येर्पथयेतु
यत्रयत्रधूमः सवह्निमानितिस्यपरिग्रहः

स॰आ॰ ५०

यत्संबंधेपस्थाप्य यादृशधर्मिहेतुनयघटितानां तत्संबंधेपस्थाप्यतादृशधर्मिसंबंधेनयघटितानांच
यादृशयादृशविशिष्टार्थानांबोधकानुदाहरणघटकानिसांशहायिकानि। तादृशतादृशविशिष्टार्थबो
धनिमेवनिवेशः ननुयादृशापत्तसाध्यहेतुकानि यादृशोयादृशोधर्मिणि यादृशयादृशविशिष्टार्थवत्त्वसमू
हालंबनबोधजनकान्युदाहरणानि तादृशानितावद्बोधानां। व्युत्क्रमेणैक्यघटकनागकसमुदायवारणा
यतत्तत्समुदायत्वंच्छेदकत्वस्यनिवेशनीयतापत्तेः एवंस्वघटकपत्यदोपस्थाप्यधर्मिणिसाध्यसामान्या
वसाध्यवत्त्वेद्वोधोतादृशाभावेतादृशभेदेधर्मिबोधांचनिवेश्यपूर्वप्रयोगाहैनघटकंएतादृशारोत्या
उत्तरप्रयोगाहँचलघुटकंनिव्यतिरेकउदाहरणलक्षणंकार्यं। अन्यतात्सावसाध्यकेतुतादृशधर्मिणिप्र
तियोगितावच्छेदकावच्छिन्नवत्ताबोधः। प्रतियोगितादृशधर्मिबोधअव्यवहितकोनिवेश्यः भेदसाध्यकेचता
दृशधर्मिणिप्रतियोगितावच्छेदकबोधः प्रतियोगितावच्छेदकेचतादृशधर्मिबोधोऽधिकः ननुप्रसन्नस्मादे
रर्थवत्त्वपदेतूक्तं। इतरभेदादिसाध्यकेतूक्तं। व्यतिरेकिन्यायत्वंवत्त्वव्यतिरेकमवयवत्वेचभिन्नमेवेति
तत्वमधिकेन। ननूदाहरणैक्येदशावारणायमयापिप्रतिज्ञाघघटकत्वंनिवेश्यतेइत्यतआहतच्चापाति
गुर्वीतिनचोपाध्यायानामुदाहरणघटकमात्रं। दिधितिस्तांतुप्रतिज्ञाघघटकत्वंचतुष्टयमधिकं। ॥५०॥
एवमुक्तयघटकेमन्त्रजनकताप्रसक्तलिसमुदायत्वंनारुकंउपाध्यायानांतुनदेकमेवेतिविपरितगौ

रवंस्थानवच्छेदकेत्यादिविशेषणघटकस्यविषयितायांतस्यभेदद्वयात्मकात्मतत्त्वमतस्यचविशेष्यघ
टकस्यजन्यतातच्चतुष्टयस्यभेदद्वयात्मकान्यतमत्वस्यैवचव्यापकतावच्छेदकविषयिता
दिसमुदायत्वसत्तकात्वघुत्वादितिवाच्यं। स्थानवच्छेदकेस्वत्रस्यत्वस्यघटकतया। विशेषणचतुष्ट
यस्यान्यतमजन्यतागर्भस्यनिवेशेनगौरवस्यदुर्वारत्वात्॥ न्यायजन्यज्ञानस्येत्यादि-प्राभाका
णित्वंतस्याऽननुकूलतरलक्षणद्वयमपेस्यपरामर्शप्रयोजकवाक्यत्वंन्यायत्वंतथाविधवाक्यघटक
वाक्यत्वेनावयवत्वमितिक्रमेणन्यायावयवलक्षणेलाघवात्। प्रतिज्ञादिपंचकवाक्यजन्यमहा
वाक्यार्थबोधस्योपनयार्थविषयकत्वेनपरामर्शरूपतया न्यायादेःक्रमेणलक्षणसमन्वयइत्याश
कामित्यर्थः। विशिष्टेति। समूहालंबनज्ञानत्वस्यार्थवशात्संपन्नत्वनयानप्रतिज्ञादिवाक्यार्थतावच्छेदक
त्वमितिविशिष्टवैशिष्ट्यबोधप्रतिमानोदर्शितः। न्यायार्थसमूहालंबनमनुपगच्छतांप्रत्येकावयव
जन्यबोधानुपात्तत्वायलक्षणप्यदुष्करताह्रासः। निराकरोतीति। निराकर्तुंस्वीयलक्षणद्वयस्या
तिव्याप्तिं निराकरोतीत्यर्थः। तथाचमूलस्थातिव्याप्तिपदस्यपरामर्शप्रयोजकयाव्यत्वस्यन्यायत्व
तेवह्निव्याप्यधूमवानयमितिवाक्येऽतिव्याप्तिः एवंतादृशवाक्यघटकत्वस्यावयवलक्षणत्वमते

ग·आ·
५१

नह्येकदेशातिव्याप्तिरित्यर्थः। स्वसमानेति व्याप्तिशंकैव नास्तीत्याह मूले नेनेति। ननु तेनेत्यादिमूल
मसंगतं यथा लक्ष्यलक्षणासत्त्वस्याऽजन्यत्वादित्यतो मात्रपदं पूरयति। परामर्शमात्रस्येति। विशेषा
विति। प्रयोजकांनपरिचेयावितिशेषः। तथा च यथोक्तलक्षणासत्वात्। तत्त्वस्येति। तथा च व्या
पर्हिसत्त्वावच्छेदकसत्त्वानिबंधनो व्यवहारोऽस्तु पेय इति भावः। लाघवतः स्वग्रहकलाघवात्। व्याप्य
व्याप्यव्यवहारविषयत्वः सोपीत्यस्योपन्यासो पीत्यर्थोऽतः परामर्शनीयं पूरयति। वाह्नीति। अन
व्यपेक्षानिसं रेतिवाक्येति। तथा च विशेषः व्याप्यव्यवहार्यता व्यावर्त्तकः तदवच्छिन्नभेदव्याप्यः तेद
प्रतियोगित्वरूपं पंचम्यर्थान्वयो बोध्यः। अन्यादृशव्याप्यव्यवहारविजयास्वत्वे दूषणासंगतिरतोयथा
दृश्येति। नियमेनं ननपितुं विधेयं पूरयति। निग्रहेतिनद्देलाविति जिज्ञासेदित्तिसनुवर्त्तते। एवम
प्येतिऽपनयप्रयोगानुपपत्तिं निरस्यति अन्नापीति। नन्वादौ ताविरह इति मूलासंगतिः चक्षुरा
देवह्निव्याप्यताबोधको वाक्यस्य द्रव्यजिज्ञासितविषयकत्वादित्यतस्तन्मूलमवतारयति। न
न्विति। अवतारणानुसारेणार्थमाह कांक्षानिवृत्तीति। ननु विजातीयबोधजनकत्वमेव न्यायत्वं यज्ञा ॥५१॥
तियबोधजनकत्वमेव प्रसक्तिजिज्ञासादिकं। एतादृशवैजात्यस्य परामर्शादावकत्वेनातोपनयेति
व्याप्तिरित्यन्येषांमतमुपन्यस्यति। अन्ये त्विति। विजातीयबोधजनकत्वस्य न्यायपदशक्यता

वच्छेदकतया न त्वकृतिनिवृत्तिप्रयोजकत्वेवैजात्यसिद्धिः एवं पर्वतो वह्निमानित्यादिवाक्यनिष्टं यद्विजातीयबोध
जनकत्वं वदेवप्रतिज्ञापदशक्यतावच्छेदकमित्याशयः। अत्र प्रतिज्ञापदवाच्यानां पर्वतो वह्निमानि
त्यादिवाक्यानां तत्तद्व्यक्तित्वेन कारणत्वेन व्यभिचारादनुगतानतिप्रसक्तरूपस्य दुर्निरूपतया विजा
तीयबोधजनकत्वस्यैवासंभावितत्वेन तस्य प्रतिज्ञापदशक्यतावच्छेदकत्वाभावेन तदवच्छेदकतया वैजा
त्यसिद्धेरसंभवात्तद्घटितलक्षणप्रसंगव्यस्तयित्याशयेन दूषयति। तन्नेति। ननु दुर्निरूपमि
तिमूलमसंगतं। जनकतानिरूपणे अनुगतरूपानपेक्षणादत आचष्टे। असंभवीति। तथा च किंचि
द्धर्मावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतयैव वैजात्यसिद्धिर्वक्तव्यतया कारणतावच्छेदक
स्य दुर्निरूपत्वे वैजात्यसिद्धेरसंभवेन लक्षणप्रसंगव्यस्तमिति भावः। तज्ज्ञानस्येति तथा च तादृश
रूपग्रहमंतरेण जनकत्वं दुर्ग्रहमिति मूलार्थः। दृश्यमाभ्यानतः तादृशरूपग्रहमंतरेणापि जनकता
या सुग्रहत्वात् तद्धर्मावच्छिन्नविषयकजनकताग्रहविशेषणज्ञानविधयानधर्म
ग्रहस्य हेतुत्वात्। अत एव दंडत्वग्रहेपि द्रव्ये घटकारणताग्रहनिर्वाहः। ननु पर्वतो वह्निमानित्यत्र
न वाक्यनिष्ठानुपूर्वीमत्त्वस्यैवानुगतानतिप्रसक्तस्य सुनिरूपतया तद्रूपेण विजातीयबोधप्रतिजन
कतासंभवात्तथाविधजनकत्वस्य प्रतिज्ञापदशक्यतावच्छेदकत्वसंभवात्तमत आह तस्यैकोरेति।

तथा च तादृशानुपूर्व्या एव लक्षणत्वसंभवे किमुक्तवैजात्यघटितलक्षणेनेति न वक्तव्यं लक्षणस्य लक्षणान्तरा
दूषकत्वयोस्तयोरपि लक्षणत्वमिति चेन्न। अनुगतानुपूर्वीकल्पनाया आवश्यकत्वेन तस्या एव लाघवेन प्र
तिज्ञापदार्थतावच्छेदकत्वसिद्धौ विजातीयबोधजनकत्वस्य लक्षणत्वासंभवेनोपादानस्यैव हेतुघटकतया वैजा
त्यसिद्धिः स्यादेवं च वैजात्यघटितलक्षणस्यासंभवदुक्तिकमिति भावः। ननु विजातीयबोधजनकत्वानु
पूर्वीरूपधर्मयोः कतयोरपि विनिगमनाविरहेण शक्यतावच्छेदकतायाः आवश्यकतया वैजात्यसिद्धिर्दु
र्वारैवेत्याशंक्य लक्षणलक्षीकारे वा धर्ममाहात्म्यमेवेति। युक्त्यन्तरस्याविनिगमितत्वानुपपत्तिरित्युक्तेः। नाना
बोधस्यानाव। तस्मुद्द यतिः प्रतिज्ञाहेत्वादिस्वादिनाऽनवकाशादित्यंतेनाऽन्यथादिति। वैजात्यस्यानानात्वस्वी
कारे प्रतिज्ञाहेतुजन्यबोधे प्रतिज्ञाजन्यतावच्छेदकवैजात्यस्याविकारापत्तेः। अन्यथा नन्वतादृशी प्रतिबंधकं
तरकल्पनाकृपणेऽस्वापातात्। एतद्रूपेण गुरुत्वमपि प्रतिबंधकत्वमुपगम्यतत्र वैजात्यानुपगमेन प्रति
ज्ञावाक्यव्याप्तिः न च तादृशबोधे तादृशवैजात्यानुपगमे तद्वृत्तिः विजातीयबोधजनकतारूपलक्षणजन
कत्वं न प्रत्येकपदार्थमपि तु स्वरूपयोग्यत्वेनेति केवलप्रतिज्ञावाक्ये तज्जन्यबोधध्वंसे एतत्प्रतिज्ञावाक्येः फलोपहि
तत्वाभावेऽपि स्वरूपयोग्यतासत्त्वेन लक्षणसमन्वयादिति वाच्यं। स्वरूपयोग्यता च तादृशवैजात्यावच्छि
न्नबोधजनकतावच्छेदकत्वं च वैजात्यं धर्मवत्त्वं एवं च कारणतावच्छेदकत्वेनाभिमतस्य धर्मा ॥५२॥

नावश्यकतया तत्रैव लाघवेन लक्षणत्वस्य प्रतिज्ञापदार्थतावच्छेदकत्वस्य च संभवादुक्तवैजात्यावच्छि
न्नबोधजनकतावच्छेदकधर्मवत्त्वे शक्यतावच्छेदकत्वस्योपगमेऽपि वा तद्घटकतया वैजात्यसिद्धेरना
वान्तरवैजात्यस्य नानात्वस्वीकारः समुचित इति भावः यत्तु तत्स्वीकारे हीति। प्रतिज्ञापदार्थतावच्छेदकत
यासिद्धवैजात्यादेः कारणतावच्छेदकस्य सुनिरूपतयानानुगतरूपस्य दुर्निरूपत्वेनेति भावः इति तत्र तथा सति
तस्यैव लक्षणत्वादित्यस्य न प्राबल्यसाधकताव इति शिथिलसंगतेः उक्तरीत्या प्रतिज्ञापदार्थतावच्छेदकतया
सिद्धवैजात्यस्यैव दण्डनिष्ठवैजात्यसाधकत्वसंभवात्। केचित्तु तस्यैवेति। तथा च सुनिरूपत्वेन तस्यैव लक्षणत्वा
पत्तौ तयैव सुनिरूपितत्वस्य चक्षुरग्राह्यतया तद्दुर्निरूपमेवेति भावः। कारणतावच्छेदकस्य दुर्निरूपत्वेऽपि जातिसि
द्धिस्वीकारे बाधकमाहात्म्यमेवेति। वदंति एतदेव हि दीधितिकृता केचित्त्वित्यादिनाभिधास्यते। मानाभाववद्ग्रस्य तात्पर्या
तरं वक्तो मतमुत्थापयति। अनुगमेनेति। वैजात्यस्यैकोऽनुगतलक्षणं स्यात्तदेव तु नेत्यर्थः। अवयवाश्च संभ
वेहेतुः। एकैकजन्यनानावयवजन्यबोधगतजातिभेदे नानुगमो बोध्यः। एकैकेति। अनेकावयवजन्य
तावच्छेदकजातिघटितलक्षणे अवयवान्तरान्यतमप्रवेशो गौरवं। यदि प्रतिज्ञानत्वप्रसंजकजातिघ
तावयवलक्षणेति बोध्यं। कदाचिदित्यादि। स्यादिति संभावनामात्रान्न व्यभिचारित्वमान इत्यनुवर्त्त
तेति। इस्यचिमतमे आदेः तादृशस्य अतिप्रसक्तत्वेऽप्यनुगतत्वस्य। तादृशजातिर्जातिविशेषः अनुगतेति दुर्नि
रूपमिति दूषणे इतिशेषः अपि हि इति। तथा च अन्यथेत्यादिदूषणमप्यत्र मनिरूपत्वनिरस्तदर्थः प्रतिज्ञा

न॰आ॰
५३

अवयवादितिमूलस्य प्रतिज्ञादिलक्षणपरत्वं दूषितिकारोक्तं तज्जनकेति मूलपाठस्य वक्तव्य खंडपत्ति
इत्यादिना तेनैवेति। दोषान्तरमप्युक्तमेव न तत्प्रशंकातिरस्कारणायलिंचेति। न्यायपदादेर्नानार्थत्वे
मानान्तराबाज्ञगतीतजैयावं तोचिन्नि पदार्थत्वैतुक न्यायास्तेषां सर्वेषामनुगतलक्षणं कार्यं। नच
न्यायसामान्यात् पर्वमिति ज्ञापकः समूहालंबनात्मकबोधो जायते तत्र एकैकवैजात्यं स्वीकृततादृशवैजा
त्यावच्छिन्नबोधजनकत्वं न्यायसामान्यलक्षणं। एवं जगति विद्यमानावयवसामान्यलक्षणमपास्ति
मूलकृद्दासायमसिस्येत्य। अत्र च स्वेच्छया दैवैयथ्यमापां सार्थक्यनपूर्वकं परिहरता जत्वेकमिति।।
नन्वेवं न्यायादिसामान्यलक्षणस्यान्यचे साद्दिनान दूषणं न बलीत्यत आह एवं चेति। तासां चेति हिन्ना
दिन्यायजन्यबोधेसमावेशानुपगमेनुव्यभिचारः स्यादिति बोध्यं। तदेति। एवं तत्पसामान्यलक्षणसिद्धौ
वैजात्यान्तरमपि स्वीकृतत्न्यायविशेषलक्षणमपि कार्यमिति। विशेषलक्षणानुरोधेन तत्तत्तत्वैजात्यां
स्वीकारे संकरः। एवमवयवसामान्यलक्षणस्योक्तत्वे तत्तद्विशेषेपि संकरइत्यर्थः जातिस्वीकारेऽसंक
र्यादि आनुचितइति। एवं चेहानीम त्विज्ञासामान्यलक्षणस्याउक्तत्वे नाग्रेतल्लक्षणे कौनपौनरुक्त्य
मिति का नः कथंचिदिति। तथा च मूलपुस्तके व विस्मरणेपुनः कथनं बीजं ननु बोध पदमालोच्य ना
दिप्रीतिनि कारणा मिति सावः विषयो विधेयः विधेयेत्यपाठः अवयवांतरे धूमादिति हेत्ववय
वोक्ते तस्यापि हेतुत्वे ह्यमकधूमविधेयकबोधजनकत्वात्। तद्विशेषपरत्वं सात्यवत्य तत्पदस्यं बोध ॥५३॥

कबोधेतितद्देकदेशे बोधे विषयितासंबंधेन साध्यवत्त्वान्वयः। एवं च साध्यवत्त्वविषयक
बोधजनकत्वे सति न्यायावयवत्वमिति निष्कर्षः। ततश्चेनेति। तथा सति न्यायत्वघटकप्रतिज्ञायावि
शिष्यनत्निवेशोपि अवयवांतरे तिव्याप्तिः पक्षतावच्छेदकादेः केवलान्वयित्वात् अतः विशिष्टवैशि
ष्ट्यावगाहित्वावच्छिन्नजनकतानिवेशात्। हेत्विति। तस्यप्रतिज्ञासहकारेण हेत्वादिजन्यत्वात् इदं तु
बोध्यं। परस्परव्यभिचारवारणाय कारणोन्तर्यस्यावश्यकतया न विषयविषयित्वनिवेशासंभवः।
तादृशाभावस्य न्यूनवृत्तेर्व्यापिकायावान्तर्यताया निवेशोप्यमेऽवयवांतरे हि तादृशहेत्ववयवघटितप्र
तिज्ञा[illegible]स्त्वीयहेतावतिव्याप्तिः। तत्समनियततानिवेशो साध्यविशिष्टपक्षेतरविशिष्टयबोधावच्छेदकत्वे
तस्याप्यसिद्धेः। तादृशपक्षेतरविषयकत्वानवच्छिन्नतायास्तस्यानिवेशोप्यवयवांतरेऽतिव्याप्तिः।
तज्जन्यताया अपि विषयविषयित्वानवच्छिन्नत्वात्। तादृशपक्षविषयिताघटकविषयितासम्बन्ध
बोधोक्तावपि हेत्वर्थज्ञानघटितप्रतिज्ञादेहेत्वादेरतिव्याप्तिः। तस्मात्तादृशायादृशानुपूर्व्यवच्छि
न्नज्ञानस्य प्रकृतसाध्यविशिष्टपक्षबोधकत्वं तत्तदुत्तरत्वावच्छिन्नजन्यतान्यतमजनतानिवेशः।
वस्तुतस्तु तादृशतादृशानुपूर्वीविषयितान्यतमविषयिताशालित्वेन जनकत्वोपगमान्तःकारणान्त
र्यनिवेशप्रवृत्तिरिति तादृशविशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नजन्यतानिवेशः सम्यक्। नन्वेव
मेवस्वेष्टार्थं बुद्धित्वावच्छिन्नजन्यतावारणेनैकदेशाकारणोप्यासां नवत्वमेवास्त्वित्यत आह न्यायेति।

ग॰ आ॰ ५४ प्रतिज्ञार्थत्वपर्यवसितिवेशेन पर्वतो धूमवान्वह्निमानिति बोधजनकस्य तत्वाल्लिङ्गनिगमनेनेति। न च मतयोर्नि
रर्थकतया केवलनिगमनवाक्यसाध्यवैशिष्ट्यावगाहिबोधसंभवः। यद्यप्ययमादिनिगमनोत्तमांगेऽनि
ष्पत्तिः। संभवति अनुषंगपदानुरोधेन विशिष्टवाचकपदाध्याहारोपनयनिगमनयोर्घटकाभावाद्यथाघटित
स्य वाक्यविशेषस्यैवं स्वत्वमस्तु तथापि पदार्थान्तु। वस्तुतस्तत्त्वेऽन्यायावयवत्वघटकप्रतिज्ञाहेतुनयघटकत्वा
ग्रहयाघटितत्वमात्रनिवेशेऽपरत्वमस्तु। तथापि पक्षतावच्छेदकतिवेशोऽप्यनुषंगपदे एतद्दोषस्ताद
वस्थ्यान्नातिव्याप्तिकॄप्तये वयितुं शक्यो निवाचो। अननुषंगपदे एव तस्योक्तत्वात्। तत्र उपनयार्थ
धर्मिकनिगमनार्थबोधस्य साध्यवैशिष्ट्यावगाहित्वज्ञानकत्वेऽपि यनयसाधारणेऽपि न्यायावयव
त्वविशेषितत्वात् प्राज्ञनकत्वं निगमनत्वमेवेत्यतिव्याप्तिः इदानीं च तथाविधयत्किंचिज्ज्ञानविषयव
र्णसमुदायत्वं न विवक्षितमित्याशयः। यद्वामनुपः साध्यकमते निगमनेऽतिव्याप्तिविधाने। अन्य
थापक्षतावच्छेदकांतर्निवेशेऽप्यनुषंगपदे इतिपंक्तिस्तु तत्रैरर्थक्यमते। अपवासापि साध्यसमतेप्र
तिज्ञायां पक्षेऽपि साध्यस्य यादृशं विशेषणत्वं तादृशविशेषणत्वज्ञानात्॥ परंतु समाधाने किंचिद्धर्म
विशिष्टसाध्यविशिष्टत्वलक्षणमुक्तमवैयर्थ्यात्। तन्निवेशः – मनुपसाध्यकेऽपि निगमनेऽतिव्याप्तस्त
दोषतदवस्थ्यात् साक्षात्परंपरासाधारणप्रकृतपक्षविशेषणत्वेन साध्यविषयत्वं तु न निविष्टं। मनुप ५४।।
निरर्थकतानापत्तेर्नियमात्। अन्यथा तथाविधधर्मिविशेषणहेतुकेऽप्युपनयेऽतिव्याप्त्यसहेन

मा प्रकृतनिवेशः न तु ... तिज्ञायां साध्यस्य यादृशविशेषणत्वं

प्र

म्नो॰

किंचिद्धर्मविशिष्टहेतुस्य वैयर्थ्यापत्तेरिति ध्येयं। तावच्छेदव्याप्तेति। साध्याधिकरणत्वेन साध्ये नि
वकरूपेणास्यानिवेशात्। ननु दृष्टान्तस्य व्यापकत्वेन साध्यबोधकतया शुद्धहेतुनिवेशादेव वारणे किं प
क्षतावच्छेदकनिवेशेनेत्यत आह अपातेति। सकृदेवेति। पक्षधर्मत्वनिवेशेनेत्यादिः। हेत्वधिकरणतांचि
त्रितविषयतानाकांक्षत्वं यत्स्यदंशत्वमिति। ननु तदर्थस्य महानसत्वादेरपि मानं च तथा च धूमवंतो
वह्निमंत इत्येवमसंदिग्धज्ञानं न बोधः। प्रत्येकं धूमवान्तो धर्मितावच्छेदकप्रकारत्वावगतिरूपक इति
प्राचीनपद्यम्। ननु नत्र शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं न तावत् साध्यतावच्छेद
कनिष्ठनिरवच्छिन्नप्रकारतानावच्छेदकतात्वेन तथा सति निगमनेऽतिव्याप्तेरवारणापत्तेः।
तत्र साध्यतावच्छेदकनिष्ठावच्छेदकतायानिरवच्छिन्नत्वात्। नापि साध्यतावच्छेदकेतरधर्मा
नवच्छिन्नप्रकारताकत्वं। उपनये च व्यापकतावच्छेदकसाध्यतावच्छेदकमानादेन दृष्टतामिति।
यत्किंचिद्धर्मविशिष्टहेतुकमितिवाच्यं। तथा सति धूमवान्धूमव्यापकवह्निमानित्युदाहरण
जन्यबोधमादायाव्याप्तेरित्याप्तेः। संगमयितुं शक्यतया पक्षतावच्छेदकनिवेशेन नत्परीत्यारस्य
स्तुवरतया च प्राचीनमतानुधावनासंगतेरिति चेन्न। अत्र केचित्। साध्यतावच्छेदकता

ग·आ· विशिष्टप्रकारतानिरूपकत्वं तद्विवक्षितं। वैशिष्ट्यं च स्वपर्याप्त्यनवच्छेदकधर्मावच्छिन्नावच्छेदकतानि-
रूपकत्वस्वसमानाधिकरणावच्छेदकतानिरूपकत्वोभयसंबंधेन स्वं साध्यतावच्छेदकताऽनिगम-
५५ नेवस्वपर्याप्त्यनवच्छेदकधर्मोऽप्रसिद्ध इमेवेतिनाति व्याप्तिः साध्यतावच्छेदकेतरधर्मावच्छिन्नसा-
ध्यप्रकारताकत्वनिवेशो लाघवेपि प्रमेलप्रवृत्तिनिवेशविद्वेषिनिरूढहरणे व्यापकतावच्छेदकत्व-
विशिष्टसाध्यतावच्छेदकत्वावमलेन धारणार्थं अनुगमो रवस्याप्रसंगीकारात् निरवच्छिन्नसाध्य-
तावच्छेदकनिष्ठावच्छेदकताभावच्छेदकत्वानिरूपकप्रकारतानिवेशासंभवाच्च। एवं चोदाहरणेऽति-
व्याप्तिसंगमनार्थं प्राचीनमतानुसरणमावश्यकमिति। हेतुघटितस्य हेतुत्वे धूमीयत्वमिति बोधस्य
वारणाय प्रतियत्संबंधनिवेशः। एतेन पर्वतो ज्ञानविषयवानिति सन्दिग्धलापनिगमने तिव्याप्तिः।
साध्यतावच्छेदकविषयत्वस्य विषयताद्वेनैव नानात्। अवच्छेदकत्वानिरूपकत्वस्य लाघवेसा ज्ञानत्वं-
परासाधारणावच्छेदकतानिवेशेन प्रकारतायास्तादृशज्ञानत्वादिधर्मावच्छिन्नावच्छेदकतानिरूपकत्वे-
नलक्षणे व्याप्तिवारणे च पर्वतो वह्नित्वावच्छिन्नवानिति प्रतिज्ञायां वह्निप्रकारतायास्तादृशवह्नित्वघ-
टकधर्मावच्छिन्नावच्छेदकतानिरूपकत्वाद् व्याप्तिः स्वानवच्छेदके तत्त्वोपि साज्ञात्वं परासाधारण- ॥५५॥
ज्ञातित्वादिना वह्नित्वादेः साध्यतावच्छेदकत्वेनूह्यं साध्यतावच्छेदकतावच्छेदकतानिविशिष्टेत्याहुरिति॥

वच्छेदकतानिवेशे तु पर्वतो धूमज्ञानज्ञाप्यवान् धूमादित्यादिस्थलोपनिगमनेऽधूपपदानुषंगपक्षेऽतिव्या-
प्तिर्दुर्वारैवेति प्रस्तुतं नादृशव्याप्याद्यवच्छिन्नावच्छेदकत्वानिरूपकत्वात्। साध्यतावच्छेदकतापर्याप्त्यन-
वच्छेदकधर्मावच्छिन्नावच्छेदकत्वानिरूपकसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वं तु साध्यतावच्छेद-
कविशिष्टवैशिष्ट्यावगाहित्वमित्यर्थः। नन्वेवमुपनयार्थस्य व्यापकसामानाधिकरण्यरूपव्याप्तिघ-
टितत्वया व्यापकतावच्छेदकतायाः साध्यतावच्छेदकांशविशेषणत्वेन प्रवृत्तनिवेशादेवोपनयस्या-
पिवारणसंभवात्। यत्किंचिद्धर्मविशिष्टइत्यस्य वैयर्थ्यं। न चानानुषंगपक्षे शुद्धत्वस्यतात्पर्यतया लक्ष्य-
त्वेऽपनयवारणार्थमेव तत्पदमपकेऽपनयस्य पक्षद्वयेपि वारणीयत्वादिति वाच्यं। अग्रेतनस्याग-
स्य चिंतनीयताभिधानादिति चेन्न। उपनयार्थे साध्यवद्व्यावृत्तित्वरूपव्याप्तिघटिके प्रतिज्ञाये-
ण तदुपादानात् न तु साध्याभाववद्वृत्तित्वरूपा व्याप्तिः। अन्यावत्त्वरूपसाध्यधर्मितावच्छेदकत्व-
वेशात्। अननुयोगितयामेवसाध्यनिरूपितवृत्तिनिवेशाच्च। हेतुप्रमेयं प्रमेयादित्यादौ हेतुवारणा-
य साध्यतावच्छेदकसंबंधस्य निवेशनीयत्वात्। उपनयार्थे साध्यसंबंधितावच्छेदकरूपवत्त्वरू-
पा व्याप्तिर्घटिकेति केचित्। नन्वेवमपि पक्षव्यावृत्तस्योदाहरणार्थतायाः पूर्वमभिधानेन

न्या॰आ॰ ५८ साध्यवदन्यावृत्तित्वस्यैवोदाहरणार्थघटकत्वासंभवादाद्यानुदाहरणे प्राचीनमतनिरासोदाह
रणोत्तरं दरणं व्यर्थमिति चेन्न। उदाहरणार्थे व्याप्तिर्न घटिका किंतूपनयार्थ एव तच्च तन्मते धू
मवान् वह्निमद्भिन्नो न वेति संशयापसारणार्थं विशिष्योपस्थितसकलहेत्वधिकरणे वह्निमत्ता
बोध आवश्यक उदाहरणार्थव्याप्तिज्ञाने च नेदं नार्थं उक्तबोधस्यास्वतोपेक्षणीयत्वापत्तेरिति
प्राचीनमतोद्धरणं सम्यगेव। यद्यपि वह्निमत्त्वाज्ञानपर्वतपक्षके उपनयार्थे व्यापकसामानाधि
करण्यरूपव्याप्तिज्ञानेपि यत्किंचिद्वह्निमद्विशिष्टे इत्यस्य सार्थक्यं। नच साध्यतावच्छेदकावच्छिन्नप्र
कारतानिरूपितमुख्यविशेष्यतानिवेशेन तत्प्रयोजनं ज्ञातार्थं न तु विशेष्यतायां किंचिद्धर्मा
वच्छिन्नत्वपर्यंतस्याभिप्राय इति वाच्यं तथा सति साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानेपि ताव
त्पर्यंतप्रयोजनाज्ञानात्॥ तथापि प्रसिद्धस्थले दर्शितव्याप्तिनिवेशेनैव प्रयोजनमिति बोध्यं।
वह्निमन्महानसत्वान्नपर्वतपक्षकोपनये लाभिरेव। महानसत्वावच्छिन्ने शुद्धवह्नित्वावच्छि
न्नप्रत्याधर्मितावच्छेदकतास्वत्वंनिवेशाणं। साध्यस्य हेत्वादिविशेषणत्वे व्याप्तिधर्मितावच्छेदकत्वे ॥५८॥
न च वारणं तथा चोक्तोपनयेनागतिरित्युक्तेनत्वाविशेषणपूरणमिति। यद्वा व्यापकसमाना

धिकरण्यरूपव्याप्तेर्नैवाप्युपनयार्थघटकत्वात्तथा चोपनयसामान्ये तानि व्याप्तिरित्याशयः॥
वस्तुतस्तु यत्किंचिद्धर्मावच्छिन्नत्वेन निर्वेशः निर्वेशस्तु मुख्यत्वस्यापि दोषइति॥ इदं तु शुद्धस्य प्रयो
जनं मुख्यत्वेनास्मासिद्धं॥ शुक्लेन नवतुलेखकपाठकयोः॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं
मया॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥१॥ शास्त्री घनश्यामस्य इदं पुस्तकं व्यासरघुरा
मेण लिखितं ग्रंथः॥ संवत् १८५८ ना वर्षे पौषमासे सिते तरपक्षे द्वितीयायां चंद्रवासरे लिखि
तो ग्रंथः॥

ना